CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत-साहित्यम्

कक्षा ९



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४८

संस्कृत-साहित्यम्

कक्षा ९

(संस्कृत माध्यमिक विद्यालयानां कृते)

श्री ५ को सरकार
शिक्षा मन्त्रालय
जनक शिक्षा सामग्री केन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वाधिकार जनक शिक्षा सामग्री केन्द्रमा सुरक्षित
२०२९

११९५५

मूल्य २।२४

श्री ५ को सरकार, जनक शिक्षा सामग्री केन्द्र, एजुकेशन प्रेसमा मुद्रित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



"राष्ट्रिय प्रतिभालाई फुलाउने, फलाउने
तथा जनताको मनोभावनालाई
विकासमूलक बनाउने नीति लिई लागू
गरिएको यस राष्ट्रिय शिक्षा
योजनाबाट केही वर्षभित्रै एउटा
जागरूक, परिश्रमी र उन्नतिशील
समाजको सिर्जना हुन सक्नेछ भन्ने
मैले आशा लिएको छु।"

– श्री ५ वीरेन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वर्गीय श्री ५ महेन्द्रको सन्देश

आफ्नो परम्परा अनुसार शिक्षालाई आजको बदलिँदो युग सुहाउने बनाउन र देश तथा नेपाली समाजको विकासको आवश्यकतालाई परिपूर्ति गर्न श्री ५ को सरकारले नयाँ राष्ट्रिय शिक्षा पद्धति तयार गरी यसै २०२८ सालको शैक्षिक सत्रदेखि क्रमशः अधिराज्यभर लागू गर्दै लैजाने कुरा सबैलाई थाहा नै छ । यसै नयाँ शिक्षा योजना अन्तर्गत तयार गरी पाठ्यक्रम अनुरूप लेखिएका पुस्तकहरूमध्ये यो पनि एउटा हो ।

आजको विज्ञान र प्राविधिक ज्ञानको क्षेत्रमा भएको अभूतपूर्व उन्नतिले गर्दा विश्वका विकसित मुलुकहरूका मानिसहरूको जीवनस्तर धेरै माथि पुगिसकेको छ । त्यसैले हाम्रो मुलुकमा पनि सैद्धान्तिक र व्यावहारिक शिक्षाको, खास गरेर व्यावसायिक शिक्षाको प्रचार व्यापक रूपमा गर्न नितान्त आवश्यक भएको छ । यसर्थ हाम्रा देशका सबै बालबालिकाहरू जीवनोपयोगी शिक्षा हासिल गरी आफ्नै खुट्टामा उभिन सक्ने होऊन्, अनुशासित बनी दलविहीन प्रजातान्त्रिक पञ्चायती व्यवस्था अनुरूप देशको सार्वभौमिकतालाई अक्षुण्ण राखी देश विकासको काममा प्रभावकारी योगदान दिन समर्थ होऊन् भन्ने उद्देश्यले यो पुस्तक र यस्तै तरीकाले लेखिएका अरू पुस्तकहरू पनि क्रमशः मुलुकका सबै बालकबालिकाहरूलाई उपलब्ध गराइँदैछन् । यसबाट मुलुकका सबै बालबालिकाहरूले फाइदा उठाई आफूलाई चरित्रवान्, गुणी र स्वावलम्बी नागरिक बनाउन सकून् । यही मेरो हार्दिक कामना छ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राक्कथन

परिवर्तन विकासको सोपान हो । देशको आर्थिक र सामाजिक विकास गरी जनताको जीवनस्तर माथि उठाउने श्री ५ महाराजाधिराज सरकारको सदिच्छानुसार देशमा चलेको र भविष्यमा चल्ने विभिन्न विकासकार्यहरूमा आवश्यक पर्ने देशभक्त, वफादार र अनुशासित जनशक्ति उत्पादन गर्ने उद्देश्यले शिक्षामा परिवर्तन गर्न आवश्यक परेको थियो ।

उपर्युक्त राष्ट्रिय आवश्यकता र आकाङ्क्षा पूर्तिको लागि श्री ५ को सरकारले २०२८ सालदेखि राष्ट्रिय शिक्षा पद्धतिको योजना लागू गरेको छ । यो नयाँ राष्ट्रिय शिक्षा पद्धतिको योजनाले राष्ट्र र राष्ट्रियताप्रति आस्था जगाई राष्ट्रिय एकता, सार्वभौमिकता, राजमुकुट र स्वतन्त्रताको रक्षा गर्ने, पञ्चायती व्यवस्था अनुकूल आफ्नो अधिकार र कर्तव्यप्रति सजग र सक्रिय रहने नागरिक तयार गर्ने आवश्यक प्राविधिक दक्षता विकास गर्ने विद्यार्थीलाई नैतिक, परिश्रमी र स्वावलम्बी तुल्याउने, उनीहरूको सिर्जनात्मक प्रवृत्तिको विकास गरिदिने र राष्ट्रभाषा, संस्कृति, साहित्य आदिको संरक्षण र संवर्द्धन गर्ने उद्देश्य लिएको छ ।

यी लक्ष्य अनुरूपका विद्यार्थीहरू तयार गर्नका लागि विद्यार्थीहरूको क्षमता र स्तर अनुकूलका उपयुक्त पाठ्य–पुस्तकहरूको नितान्त आवश्यकता पर्दछ । पाठ्य–क्रमको सफलता पाठ्य–पुस्तकमा नै आधारित भएकोले पाठ्य–पुस्तकहरूलाई सकभर अपेक्षित ढङ्गका बनाउन खोजिएको छ ।

श्री ५ को सरकारको शिक्षानीति अनुकूल र वैज्ञानिक ढङ्गबाट प्राथमिक कक्षाका बालकबालिकाहरूका लागि पाठ्य–पुस्तकहरू तयार गर्ने अभिप्रायले स्थापना भएको जनक शिक्षा सामग्री केन्द्रबाट हाल श्री ५ को सरकारको राष्ट्रिय शिक्षा पद्धतिको योजना, २०२८ अनुसार माध्यमिक तहसम्मका पाठ्य–पुस्तकहरू तयार गराइने व्यवस्था भएको छ । प्रमुख विषयका सबै पाठ्य–पुस्तकहरू लेखाउने र छपाउने, यी पाठ्य–पुस्तक तथा अन्य शिक्षण सामग्रीहरू नेपाल अधिराज्यका सम्पूर्ण शिक्षण संस्थाहरूमा वितरण गर्ने र पाठ्य–पुस्तकहरूको उन्नतिका लागि अनुसन्धान कार्यलाई प्रोत्साहन गर्दै लैजाने यस केन्द्रका मुख्य उद्देश्यहरु हुन् । यही उद्देश्यानुरूप यो पुस्तक लेखने काम भएको हो ।

यो पुस्तक प्रा. शिवप्रसाद सत्याल 'पीठ'ले लेख्नु भएको हो ।

यस पुस्तकलाई अझ बढी प्रभावकारी बनाउँदै लैजाने काममा शिक्षाविद्‌हरूको सल्लाह र सुझाउको हार्दिक स्वागत यो केन्द्र गर्दछ ।

श्री ५ को सरकार
शिक्षा मन्त्रालय
जनक शिक्षा सामग्री केन्द्र

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विषय–सूची

१. प्रथमो भागः

काव्य—सिद्धान्तः

१. काव्यहेतुः	१
२. काव्यलक्षणम्	३
३. शब्दः	६
(क) पदम्	९
(ख) वाक्यम्	१०
४. लक्षणानि	१२
५. काव्यगुणाः	१५
६. अलङ्काराः	१८
(क) शब्दालङ्काराः	१९
(ख) अर्थालङ्काराः	२२

छन्दः सिद्धान्तः

छन्दोभागः	४२

२. द्वितीयो भागः

पद्यकाव्यम्	५६

रघुवंश महाकाव्यांशः (प्रथमद्वितीयसर्गौ)

१. महाकवि कालिदासः, तस्य रघुवंश–महाकाव्यञ्च	५७
२. प्रथमसर्गस्य कथासारः	६०
३. रघुवंशस्य प्रथमः सर्गः	६२
४. द्वितीयसर्गस्य कथासारः	७५
५. रघुवंशस्य द्वितीयः सर्गः	७७

किरातार्जुनीयांशः (प्रथमः सर्गः)

१. महाकविः भारवि स्तस्य किरातार्जुनीयञ्च	८७
२. प्रथमसर्गस्य कथासारः	९०
३. किरातार्जुनीयस्य प्रथमः सर्गः	९२
सूक्तीनां संग्रहः	९९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यहेतुः

लोके हि यत्किञ्चिदपि कार्यं कारणं विना न सम्भवति । कारणं हि वस्तुतः कार्यस्य बीजमेव । यदि कारणं विनाऽपि कार्यसम्भवस्तर्हि बीजं विनाऽपि वृक्षोत्पत्तिः फललाभश्च सम्भवेत्; पितरौ विनाऽपि पुत्रो जायेत ! परन्तु न कुत्रापि एवं दृष्टं नैव श्रुतम् । अत एव साहित्यिकैर्दार्शनिकैश्च एतादृशः सिद्धान्तः स्वीकृतः, यत्कार्योत्पत्तौ कारणमावश्यकमिति । काव्यं वा साहित्यमपि कवेः कार्यरूपमेव नान्यत् ।

अतः काव्येऽपि कारणस्य सुतरामपेक्षा सञ्जायते । काव्यकारणविषये च विदुषामैकमत्ये सत्यपि कारणस्वरूपस्य निर्धारण-विषये तेषां विवादोऽस्ति । केचन आलङ्कारिकाः प्रतिभां तत्कारणं स्वीकुर्वन्ति, अपरे विद्वांसो व्युत्पत्तिमन्ये च अभ्यासं काव्यकारणं मन्यन्ते । बहव आलङ्कारिकाः संयुक्तानामेव त्रयाणां काव्यकारणस्वरूपत्वेन चर्चामकुर्वन् प्राचीनकाव्यग्रन्थेषु । चन्द्रालोके जयदेवः स्वाभिमतं काव्यकारणस्वरूपं प्रस्तौति अधस्तनश्लोकेन–

"प्रतिभैव श्रुताभ्याससहिता कवितां प्रति ।
हेतुर्मृदम्बुसम्बद्धा बीजमाला लतामिव ।।"

(१) प्रतिभा नाम प्रतिक्षणं नवीनरूपेण उद्बोधनशालिनी बुद्धिः (प्रज्ञा) ।

(२) श्रुतं नाम लोक-व्यवहारावलोकनतः शास्त्रपरिशीलनतश्च प्राप्तं ज्ञानम् । इदमेव केचन समीक्षका व्युत्पत्तिं वदन्ति । "व्युत्पत्तिश्च बहुज्ञता, युक्तायुक्तविवेको वा" इति राजशेखरः काव्यमीमांसायाम् ।

(३) अभ्यासश्च काव्यकर्मणि अविरल-क्रमेण मनोयोगो लगनम् वा इति । एवं श्रुताभ्यासपुष्टा प्रतिभा काव्यकारणं भवति । यथा पानीयसिक्ता कोमला मृत्तिका बीजं च समुदिततया लताकारणं; तथैव श्रुतं श्रुताभिषिक्तोऽभ्यासस्तद्युक्ता प्रतिभा एव काव्यकारणमिति श्लोकार्थः ।

नेपाली भाषायाः साहित्यकाराणां मतमपि प्रायोऽनेन सममेव । "सम" इत्युपाह्वा वालकृष्णमहोदयाः[1] "कारुण्यं (अश्रु)" तत्कारणं मन्वते । एवमेव महाकाविर्देवकोटाः, घिमिरे-माधवप्रसादाश्च[2] "प्रतिभाम्" काव्यकारणं मन्यन्ते । परन्तु आधुनिक-कवे विजयमल्लस्य[3] मते "काव्यं हि अविच्छेदेन (अविरल-क्रमेण) कृतस्य अभ्यासस्य साधनायाश्च परिणाममात्रं नान्यत् ।" एवं विदुषां मत-विवादः, तथापि प्रतिभैव काव्यकारणमिति बहूनामैकमत्यम् । वस्तुतः प्रतिभां विनाऽपि यदि

१. "आँसु नै त कविताको मातृभाषा हो ।" मेरो कविताको आराधना, उपासना— १

२. "कविको निम्ति प्रतिभा नै वस्तुको प्रथम रूप हो र प्रतिभा नै वस्तुको अभिव्यक्तिको सङ्गीत हो ।" कविता– व. २, अं. ३ ।

३. "कविकर्म अविरल अभ्यास र साधनाको प्रतिफल मात्र हो ।" मेरा काव्यगत मान्यताहरू ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यरचना सम्भवेत्तर्हि सर्वेऽपि साक्षराः कवयः स्युः, परं लोके नैकमपि उदाहरणमेतादृशं दृष्टम् । अत एव श्रुताभ्याससहिता प्रतिभैव अर्थात् संयुक्तानामेव प्रतिभाश्रुताभ्यासानां काव्यकारणत्वमिति निश्चयः ।

अभ्यास—प्रश्नावली

१. रिक्तं स्थानमुचित-शब्दैः पूरणीयम्–
 (क) प्रतिभा नाम....................बुद्धिः (प्रज्ञा) ।
 (ख) देवकोटामते काव्यकारणं.............. ।
 (ग) ....अभ्यासः कथ्यते ।
 (घ) श्रुतं नाम..............प्राप्तं ज्ञानम् ।

२. "क" वर्गात् "ख" वर्गाच्च एकैकं गृहीत्वा समुचितौ मेलय–

"क" वर्गः	"ख" वर्गः
(क) माधवप्रसादः	(क) श्रुताभ्याससहिता प्रतिभैव काव्यकारणम्
(ख) जयदेवः	(ख) प्रतिभा काव्यकारणम्
(ग) प्रतिभा	(ग) प्रतिक्षणं नवीनरूपेण उद्बोधनशालिनी बुद्धिः
(घ) बहुज्ञता	(घ) समः

३. शुद्धस्थले ईदृशं (√) चिह्नमशुद्धस्थले चेदृशं (×) चिह्नं देयम्–
 (क) प्रतिभा नाम काव्यकर्मणि अविच्छेदेन (अविरल–क्रमेण) लगनम्।
 (ख) सर्वमपि कार्यं कारणभपेक्षत एव।
 (ग) वालकृष्णमत "कारुण्यं" काव्यकारणम् ।

४. निर्दिष्टाः प्रश्नाः संक्षेपेण उत्तरणीयाः–
 (क) को नाम अभ्यासः? स कथं काव्यकारणम्?
 (ख) कारणं विना कार्यं न जायते, इति उदाहरणेन स्पष्टयत
 (ग) जयदेवमतेन काव्यकारणं व्याख्यात
 (घ) उपर्युक्तेषु काव्यकारणेषु कस्य मतं भवते रोचते? किं च तत्र कारणम्?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्यलक्षणम्

लक्षणं नाम वस्तुस्वरूपपरिचायकं सूत्रात्मकं वाक्यम् । लक्षणं च परिभाषा शब्देन ज्ञातुं शक्यते । काव्यं वा कविता वा वस्तुतः कवेः कृतिरेव, इति समालोचकाः । अत्र "शब्दार्थौ काव्य' मिति बहूनां विदुषां विचारः, तत्रापि काव्यस्वरूपानुकूल–तत्वान्तरसमावेशेन काव्यलक्षणानि पृथक् पृथक् प्रतीयन्ते । तेषु जयदेवस्य चन्द्रालोकस्था परिभाषा सरला, सुप्रसिद्धा च । तन्मते–

"निर्दोषा लक्षणवती सरीतिर्गुणभूषणा ।
सालङ्काररसानेकवृत्तिर्वाक् काव्यनामभाक् ।। "

(१) रसास्वादस्य विघातको विलम्बको वा दोषः श्रुतिकट्वादिकः । यदि काव्याद्रसास्वादो न स्यात्तदा काव्यत्त्वरूपस्यैव हानिः, रचयितुर्न्यूनता चेति समीक्षकाः । अत एवान्ते, एतादृशो निष्कर्षः, यत् – काव्याद्दोषो निवार्य इति ।

(२) काव्यस्वरूपपरिचायकं लक्षणमक्षरसंहत्यादिकम् । यदि काव्ये तत्परिचायकानि लक्षणानि न स्युस्तर्हि किं काव्यमकाव्यं वेति ज्ञातुमपि न शक्यत इति तद्बोधकस्वरूपाभावात्तस्याऽऽवश्यकता ।

(३) रीति र्नाम रचनाशैली पाञ्चाल्यादिका । यदि रचनाशैली न रुचिरा तर्हि रसास्वादस्य विषय एव लुप्तो भवेदिति रीतेरावश्यकता ।

(४) यथा मनुष्ये शौर्यसाहसभीरुत्वादय आभ्यन्तरगुणा स्तथैव काव्येऽपि माधुर्यादयो गुणाः । यथा स्वसत्त्व–स्थापनाय ख्यापनाय च मनुष्ये शौर्यादयो गुणा आवश्यकास्तथैव काव्येऽपि तादृशगुणानामावश्यकत्वं स्वस्वरूप–ख्यापनाय ।

(५) अलङ्कारश्च रसस्योत्कर्षाधायकं काव्यस्य बहिरङ्गमनुप्रासोपमादिकम् । अलङ्काराभावेऽपि केचन विद्वांसः कविकर्मणः काव्यत्वमङ्गीकुर्वन्ति, जयदेवमते रचनायाः काव्यत्वसिद्धये अलङ्कार आवश्यकः ।

(६) रसश्च काव्यमधीयानैः सहृदयैरनुभूयमान आस्वादश्चमत्काररप्रतीति र्वा । यदि काव्ये अनुभूयमानः कश्चित् विलक्षण आस्वादो न स्यार्नहि काव्यस्य काव्यातिरिक्त-विषयस्य च भेदो न स्यात् । वस्तुतस्तु काव्यं हि रसात्मिका रचनैवेति काव्ये रसस्थितिः प्राणास्पदा ।

(७) वृत्तिर्नाम "शाब्दबोधहेतुपदार्थोपस्थित्यनुकूलपदपदार्थयोः सम्बन्धः" इति केचित् । वस्तुतः वृत्तिर्नाम शब्दार्थबोधिका शक्तिस्तथा च काव्यसिद्धान्ते वृत्तिर्नाम रसानुकूल-वर्णविन्यासक्रमो मधुरादिकः । यदि वृत्तेरभावः स्यात्तर्हि न शब्दार्थयोरवबोधो न च रसानुकूला रचना सम्पद्यत इति वृत्तेरावश्यकत्वम् । एवं च निर्दोषता, सलक्षणत्वं, रीतिमत्त्वं, गुणयुक्तत्त्वं,सालङ्कारत्त्वं, रसान्वितत्वमनेकवृत्तिमत्त्वं च काव्यघटकानीमानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्त्वानि काव्यस्य बहिरङ्गानि, अन्तरङ्गानि च। एवं च निष्कर्षः समायाति–

"गुणालङ्काररसरीतिवृत्तिलक्षणवती निर्दोषा वाणी काव्यमिति ।"

नेपाली साहित्ये काव्यं बहुधा परिभाषितमस्ति समीक्षकैः कविभिश्च । "काव्यं नाम कवीनां हृदये स्थितात् प्रेरणात्मकस्पन्दनात् प्रवाहिताया मधुराया झङ्कृतेः प्रकटरूपमापन्नं स्फुरणम्" इति साहित्यप्रदीपे सिग्द्यालः सोमनाथः । अस्माकं विद्वांसो हि काव्यं कवितां च पृथक्तया जानन्ति । केचित्, सोमनाथ–माधवप्रसादादयस्तु अपृथगिति मन्यन्ते । "कविता हि भावनाया बौद्धिकं सौकुमार्य" मिति बालकृष्णसमः । "यद्धि तत्त्वं मानवतायाः पोषकं तदेव कविता" इति जोशीत्युपनामा रत्नध्वजः । एवम् अस्माकं साहित्येऽपि विविधा परिभाषाः पृथक् पृथङ्मतेन निरूपिताः सन्तीति सर्वेषां मतोल्लेखेन न कश्चिल्लाभः । तथा हि उदाहरणम् :–

"स्रगीयं यदि जीवितापहा
हृदये किं निहिता न हन्ति माम् !
विषमप्यमृतं क्वचिद्भवे–
दमृतं वा विषमीश्वरेच्छया ।।"

अत्र हि श्लोकार्थः स्फुटं प्रतीयत इति प्रसादो गुणः, पूर्वार्धेऽभिहितस्य उत्तरार्धेन समर्थनादर्थान्तरन्यासोऽलङ्कारः, रसश्चात्र आभ्यन्तरवेदनाप्रकाशनात् करुणः । कोमलानां वर्णानां दीर्घसमासं विना प्रयोगाद् रीतिः पाञ्चाली । काव्यात्मनः करुणस्य बोधयित्री वृत्तिश्चात्र व्यञ्जना । स्रजो जीवनघातकत्वनिषेधायेश्वरेच्छाया युक्तित्वेन उपन्यासाल्लक्षणं शोभा भवितुमर्हति । रसास्वादे न कश्चिद् विलम्बो विघातो वाऽनुभूयत इति दोषशङ्कैव नास्ति । अत एवोक्तश्लोके परिभाषा–सङ्गतिरिति तस्य काव्यत्वं निष्पन्नम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास–प्रश्नावली

१.

(क) जयदेवमतेन काव्यपरिभाषा लेख्या

(ख) 'रस' शब्दस्य तात्पर्यार्थः कः ?

(ग) बालकृष्णस्य सोमनाथस्य च परिभाषा तुलनीया

(घ) गुणरीतिवृत्त्यलङ्काराणां परस्परं को भेदः ?

२. "क" वर्गात् "ख" वर्गाच्च एकैकं गृहीत्वा समुचितौ मेलय–

"क"	"ख"
(क) वृत्तिः	(क) शब्दार्थबोधिका शक्तिः
(ख) दोषः	(ख) रचनाशैली परिष्कारः
(ग) रीतिः	(ग) रसास्वादस्य विलम्बको विघातको वा

३. रिक्तं स्थानमुचितैः शब्दैः पूरणीयम्–

(क) लक्षणं नाम .... ।

(ख) अलङ्कारो नाम .... ।

(ग) यथा स्वसत्त्व–स्थापनाय .... स्वस्वरूप–ख्यापनाय ।

४. उक्तीनां शुद्धौ निर्दिष्टं चिह्नं (√) देयम्–

(क) रसः सहृदयैरनुभूयमान आस्वादश्चमत्कारो वा ।

(ख) दोषो नाम काव्यस्य रचना–शैली ।

(ग) वृत्तिर्हि काव्यस्य स्वरूपनिरूपकं काव्यतत्त्वम् ।

(घ) वस्तुतस्तु काव्यं हि रसात्मिका रचनैव

५. निर्दिष्ट–शब्दौ परिभाषणीयौ–

(क) रसः

(ख) काव्यम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दः

सर्वस्यापि वाङ्मयस्योपादानं शब्द एव । काव्यस्य अपि अभिव्यक्तिविषयत्वाच्छब्दं विना तत्स्वरूपमेव न घटते । अत एव काव्यग्रन्थेषु शब्दः परिभाषितः वर्गीकृत उदाहृतश्चास्ति । तथा च चन्द्रालोके ।

"विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते ।" इति परिभाषा लभ्यते ।

संस्कृत–शब्दानुशासने विभक्त्या सुबादयः प्रत्यया गृह्यन्ते । यस्माच्छब्दात्सुबादयः प्रत्ययाः कर्तुं शक्याः स शब्दो विभक्त्युत्पत्तये योग्यो भवति । एतादृशश्च शब्दः शास्त्रीय एव भवितुमर्हति न तु भेर्यादिवादनजन्यः । अत एव सुबादिप्रत्यययोजनीयः शास्त्रानुमतो "धातुप्रातिपदिकान्यतरप्रकृतिभागः" शब्दः कथ्यते इति जयदेवाशयः । स च शब्दो (१) रूढः (२) यौगिकः (३) योगरूढश्चेति त्रिविधः । एतेषां भेदानां चानेक उपभेदाः सन्ति ।

एतद्विषये चन्द्रालोके जयदेवस्य मतमीदृशमस्ति –

"रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा ।
अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधाऽदिमः ।।
ते च वृक्षादिभूवादिमण्डपाद्या यथाक्रमम् ।
शुद्धतन्मूलसंभिन्नप्रभेदैर्यौगिकस्त्रिधा ।।
ते च भ्रान्तिस्फुरत्कान्तिकौन्तयादिस्वरूपिणः ।
तन्मिश्रोऽन्योन्यसामान्यविशेषपरिवर्तनात् ।।
नीरधिः पङ्कजं सौधं सागरो भूरुहः शशी ।
क्षीरनीरधिराकाशपङ्कजं तेन सिद्धयति ।।"

अपरपृष्टे निर्दिष्टा सारिणी सर्वानपि भेदान् सोदाहरणान् प्रस्तौति–

एवं चन्द्रालोके वैयाकरणमतेनोपक्रम्याऽऽलङ्कारिकसम्मता शब्दव्याख्या कृता, परन्तु काव्ये शब्दस्य विशेषार्थमाकलयन्ति पूर्ववर्तिनो विद्वांसः । कुन्तकमतं वक्रोक्तिजीविते सुस्पष्टम्–

"वाच्योऽर्थो वाचकः शब्दः प्रसिद्धमिति यद्यपि ।
तथापि काव्यमार्गेऽस्मिन् परमार्थोऽयमेतयोः ।
शब्दो विवक्षितार्थैकवाचकोऽन्येषु सत्स्वपि ।
अर्थः सहृदयाह्लादकारिस्वस्पन्दसुन्दरः" ।।

तादृशः शब्दः काव्ये प्रयुज्यते यस्तत्समुचितसमस्तसामग्री सहितो भवति । स च शब्दः कीदृश इति जिज्ञासायां – विवक्षितार्थैकवाचकः इत्युदाहरणम् । विवक्षितो वक्तुमिष्टोऽर्थस्तदेकवाचकस्तस्यैकः केवल एव वाचकः । कथम् अन्येषु सत्स्वपि । अपरेषु तद्वाचकेषु बहुष्वपि विद्यमानेषु । तथा च–सामान्यात्मना वक्तुमभिप्रेतो योऽर्थस्तस्य विशेषाभिधायी शब्दः सम्यग् वाचकतां न प्रतिपद्यते । यत्र विशेषात्मना वस्तु प्रतिपादयितुमभिमतं तत्र विशेषाभिधायकमेवाभिधानं निवध्नन्ति कवयः । इति काव्यसिद्धान्ते शब्दार्थ तात्पर्यम् । "अन्तरात्मनि पच्यमाना वेधमाना वा या अव्यक्ता धारणा तस्या एवाऽभिव्यक्तेः साधनं शब्दः" इति बालकृष्णः "समः" ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्द-भेद-सारिणी-



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तथा हि उदाहरणम्–

"स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श" ।

अत्र हि 'गो'शब्दस्य' इन्द्रियादिविविधार्थसत्त्वेऽपि 'धेनु' रूपस्यैकार्थमात्रस्य विवक्षितता । अत एव 'गो'शब्दस्य' धेनुरूपार्थ एव वाचकत्वम् ।

अभ्यास-प्रश्नावली

१. निम्नस्थप्रश्नान् संक्षेपमुत्तरयत–

(क) जयदेवमतेन शब्दस्य आशयः कीदृशः ?

(ख) सममहोदयस्य शब्द–परिभाषा का ? लेखनीयाः

(ग) विभक्तेरभिप्रायः को लेखनीयः

२. रिक्तं स्थानं पूरयत –

(क) शब्दो विवक्षितार्थैक ....सत्स्वपि ।

(ख) यस्माच्छब्दात् सुबादिप्रत्ययाः कर्तुं शक्याः स शब्दः .... ।

(ग) सुबादिप्रत्यययोजनीयः .... शब्दः कथ्यते ।

३. "क"वर्गात् "ख"वर्गाच्च एकैकं गृहीत्वा समुचितौ मेलय–

"क" वर्गः	"ख" वर्गः
(क) अव्यक्तयोगः शब्दः	(क) सामान्यार्थे विशेषार्थबोधकः
(ख) संभिन्नयौगिकः शब्द :	(ख) वृक्षादयः
(ग) योगाभासः	(ग) कौन्तेयः
(घ) नीरधिपङ्कजादयः	(घ) रूढभेदः

५. अशुद्धाभिधानेषु निर्दिष्टं चिह्नं (×) देयम् –

(क) यौगिकशब्दस्य त्रयो भेदा भवन्ति ।

(ख) भूवादयः शब्दाः योगाभासस्योदाहरणम् ।

(ग) भ्रान्तिप्रभृतयः शब्दाः शुद्धयौगिकशब्दस्योदाहरणम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पदम्

"विभक्त्यन्तं पद"मित्युच्यते । सुबन्तास्तिङन्ताश्च शब्दा विभक्त्यन्ताः । अर्थात् 'रामः, मुनिः, गच्छति, खादतु' इत्यादयः शब्दा क्रियापदानि च पदमिति जयदेवः ।

"सुप्तिङन्तं पदम् (१।४।१४)" इति पाणिनिश्च । राम+सु=रामः । गम् (गच्छ्)+तिङ=गच्छति । एवंविधा एव शब्दा विभक्त्यन्ताः, इम एव च पदमिति पदस्य द्वैविध्यम् (१) सुबन्तम् (२) तिङन्तं चेति । सर्वासु विभक्तिषु सर्वेषु वचनेषु च-यानि शब्दरूपाणि तानि सुबन्तपदानि, यानि च धातुरूपाणि लडादिलकारेषु त्रिषु वचनेषु च तानि तिङन्तपदानीति दिक् ।

अभ्यास—प्रश्नावली

१. पदं परिभाष्यताम् ।

२. पाणिनीयमतेन पदं सोदाहरणं व्याख्यात ।

३. 'रमासु, दिक्षु, ज्ञानयोः, धनेश्वरः, इति पदानां सादृश्ये प्रत्येकं कृते द्वित्राणि पदान्तराणि लेख्यानि ।

४. "क" समूहशब्दानां "ख" समूहेन सह सम्बन्धं स्थापयत–

"क" समूहः	"ख" समूहः
(क) सुबन्तपदानि	(क) सुबन्तपदम्
(ख) पदपरिभाषा	(ख) विभक्त्यन्तं पदम्
(ग) पाणिनिः	(ग) कवीन्+जगतः
(घ) लतायाः	(घ) सुप्तिङन्तं पदम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाक्यम्

"सुप्तिङन्तचयो वाक्यं क्रिया वा कारकान्विता ।" इति अमरकोशेन वाक्यं परिभाषितम् । "कारकान्विताक्रिया वाक्यमथवा सुप्तिङन्तचयो वाक्य" मिति शब्दभेदेऽपि तात्पर्याऽभेदः । तथा हि "रामो गच्छति, अनुजः शेते" इत्यादिषूदाहरणेषु 'रामानुजौ' सुबन्तपदे 'गच्छति तथा शेते' च तिङन्तपदे । अत एव द्वे अप्युदाहरणे परिभाषानुकूले "कारकान्वितायाः क्रियायाः" "सुप्तिङन्तचय-स्य" वोपलब्धेः । जयदेवस्तु अर्थसमाप्तौ पदानां समूहो वाक्यमिति मन्यते । यथा चन्द्रालोके-"तद्व्यूहोऽर्थसमाप्तितः" इति वदति । अर्थसमाप्तेरभिप्रायः पदसमूहस्य निराकाङ्क्षत्वम् । सुबन्तपदानां तिङन्तपदानामेव वा केवलानां न वाक्यत्वमिति बोधयितुं "अर्थसमाप्तितः" इति कथनम् । रामः, हरिः, धनम् इत्यादीनां सुबन्तपदानां, गच्छति, अखादत्, भणिष्यति इत्यादि तिङन्तपदानामेव वा एकत्र सम्मेलनमात्रेण पदसमूहस्य, अर्थाऽप्रत्यायकतयोपन्यस्तस्य सुप्तिङन्तचयस्यापि न वाक्यत्वमिति स्पष्ट प्रतिपत्तय अमरकोशेन "कारकान्विता क्रिया वाक्य" मिति या परिभाषा प्रस्तुता, सैव स्फुटा, समर्था चाभिप्रायबोधने । यदि वक्तुरभिप्रायः पदैकमात्रेणापि प्रकटः स्यात्तर्हि पदसमूहोऽपि नापेक्षते । यथा एकः पृच्छति- 'सखे ! त्वमद्य पाठशालां गच्छसि ?' उत्तरे सखा ब्रूते- 'आम्' । 'आम्' इति पदैकमात्रेणाऽत्र 'आम् अहमद्य पाठशालां गच्छामि' (वर्तमानसामीप्ये वर्तमानवद्वा) इत्यभिप्रायबोधो भवतीति **'आम्'** इति पदैकमात्रस्यापि वाक्यता, कोशादीनां तु पदसमूहत्वेऽपि पदानां साकाङ्क्षत्वान्न वाक्यत्वमिति दिक् । एवंविधं वाक्यं खण्डवाक्यमप्यभिधातुं शक्यते । यत्र च वाक्यसमूह एकमेवार्थं प्राधान्येनोपस्थापयति, तद् वाक्यकदम्बकमिति वाक्यस्य त्रैविध्यम्-(१) वाक्यम् (२) खण्डवाक्यम् (३) महावाक्यं वाक्यकदम्बकं वेति । चन्द्रालोकशब्दे-

"युक्तार्थानां तां च विना खण्डवाक्यं स इष्यते ।
वाक्यं च खण्डवाक्यं च पदमेकमपि क्वचित् ।।
धूमवत्त्वादिति यथा देवेत्यामन्त्रणं यथा ।
वाक्यानेकार्थ विश्रान्तान्याहुर्वाक्यकदम्बकम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास—प्रश्नावली

१. निर्दिष्टशब्दानामर्थो लेख्यः –

(क) वाक्यम् ।

(ख) सुप्तिङन्तचयो वाक्यम् ।

(ग) वाक्यकदम्बकम् ।

२. प्रदत्तरिक्तकोष्ठेषु "क" समूह"ख"समूहस्थ शब्दयोः सम्बन्धं स्थापयत –

"क"समूहः	"ख"–समूहः
(क) सुप्तिङन्तचयो वाक्यम्	(क) वाक्यम्
(ख) प्राधान्येनैकार्थबोधको वाक्यसमूहः	(ख) अमरकोशः
(ग) भ्राता पठति	(ग) वाक्यकदम्बकम्

३. अशुद्धस्थलेषु निर्दिष्टा रेखा (×) अङ्कनीया–

(क) विभक्त्यन्तशब्दसमहो वाक्यम् ।

(ख) 'कविर्लिखति' इति पदसमूहस्य न वाक्यता ।

(ग) क्वचित् पदैकमात्रेणाऽपि वाक्यार्थबोधो भवति ।

(घ) चन्द्रालोके वाक्यभेदस्य त्रैविध्यं लभ्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लक्षणानि

काव्यस्य स्वरूपनिरूपकं तत्त्वं लक्षणं कथ्यते । यथा आकृत्या एव कश्चित् जनः परिचीयते, तथा च स्वरूपेण एव इदं काव्यम् ईदृशम् इति ज्ञातुं शक्यते । अत एव येन तत्त्वेन काव्यस्य स्वरूपतो ज्ञानं भवति तत् एव लक्षणम् । अथवा यथा वेशभूषादिना अयं भोटदेश–वास्तव्यः, अयं नेपालवास्तव्यः, इति भेद–ज्ञानं सामान्येन भवति, तथैव आपाततः दर्शनेन अपि यत्तत्त्वं काव्यस्य स्वरूपतः ज्ञानमुपस्थापयति तत् लक्षणम् । तच्च लक्षणं सामान्येन दशविधम् । तेषां लक्षणोदाहरणे चेत्थं चन्द्रालोके जयदेवमतेन –

(१) अक्षरसंहतिः–

अल्पाक्षरा विचित्रार्थख्यातिरक्षरसंहतिः ।
उषाकान्तेनानुगतः शूरः शौरिरयं पुनः ।।१।।

(२) शोभा–

शोभा ख्यातोऽपि यद्दोषो गुणकीर्त्या निषिध्यते ।
मुधा निन्दन्ति संसारं कंसारिर्यत्र पूज्यते ।।२।।

(३) अभिमानः–

अभिमानो विचारश्चेदूहितार्थनिषेधकृत् ।
इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि ।।३।।

(४) हेतुः–

हेतुस्त्यक्त्वा बहून् पक्षान् युक्त्यैकस्यावधारणम् ।
नेन्दुर्नार्कोऽयमौर्वाग्निः सागरादुत्थितो दहन् ।।४।।

(५) प्रतिषेधः–

प्रतिषेधः प्रसिद्धानां कारणानामनादरः ।
न युद्धेन भ्रुवोः स्पन्देनैव वीरा निपातिताः ।।५।।

(६) निरुक्तम् –

निरुक्तं स्यान्निर्वचनं नाम्नः सत्यं तथानृतम् ।
ईदृशैश्चरितैः राजन् सत्यं दोषाकरो भवान् ।।६।।

(७) मिथ्याध्यवसायः–

स्यान्मिथ्याध्यवसायश्चेदसती साध्यसाधने ।
चन्द्रांशुसूत्रग्रथितां नभःपुष्पस्रजं वह ।।७।।

(८) सिद्धिः–

सिद्धिः ख्यातेषु चेन्नाम कीर्त्यते तुल्यतोक्तये ।
युवामेवेह विख्यातौ त्वं बलैर्जलधिर्जलैः ।।८।।

(९) युक्तिः–

युक्तिर्विशेषसिद्धिश्चेद्विचित्रार्थान्तरान्वयात् ।
नवस्त्वं नीरदः कोऽपि स्वर्णैर्वर्षसि यन्मुहुः ।।९।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१०) कार्यम् –

कार्यं फलोपलम्भश्चेद्व्यापाराद्वस्तुतोऽथ वा ।
असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम् ।।१०।।

उपसंहारः–

इत्यादि लक्षणं भूरि काव्यस्याहुर्महर्षयः ।
स्वर्णभ्राजिष्णुभालत्वप्रभृतीव महीभुजः ।।११।।

अभ्यास—प्रश्नावली

(क) संक्षेपेण उत्तरं देयम्–

(१) लक्षणं काव्यस्य कीदृशं परिचयं प्रस्तौति ? स्वरूपनिरूपकम् अथवा स्वरूपघटकम् ?
(२) शोभालक्षणमुदाहरत
(३) सिद्धियुक्त्योः परस्परं को भेदः ?

(ख) रिक्तं स्थानमुचितैः शब्दैः पूरणीयम्–

(१) यत्तत्त्वं काव्यस्य स्वरूपतः ज्ञानमुपस्थापयति ....।
(२) कल्पितार्थो यत्र निषिध्यते तत्र...............नाम लक्षणम् ।
(३) ....निरुक्तं नाम लक्षणं भवति। यथा..................।

(ग) समूहद्वये शब्दानां सम्बन्धं स्थापयत–

"क" समूहः	"ख" समूहः
(१) सिद्धिः	(१) यत्र अल्पाक्षरैः अनेकार्थबोधः
(२) अक्षरसंहतिः	(२) प्रतिषेधः
(३) स्वाभाविकं कारण–मनादृत्य कारणान्तर कल्पनम्	(३) असावुदेति शीतांशुर्मानच्छेदाय सुभ्रुवाम्
(४) कार्यम्	(४) प्रसिद्धवस्तुतः पृथक् वस्तुनः साम्येन तुलना

(घ) शुद्धस्थले ईदृशं (√) अशुद्धस्थले च एतादृशं (×) चिह्नं देयम्–

(१) कार्यस्य कारणस्य चाऽसत्यकल्पनायां मिथ्याध्यवसायो गुणः।
(२) काव्यस्य स्वरूपघटकं तत्त्वं लक्षणम् ।
(३) कार्यं प्रति बहुषु कारणेषु अपि एकस्य एव निश्चये हेतुर्गुणः ।
(४) "इन्दुर्यदि कथं तीव्रः सूर्यो यदि कथं निशि !"
इति निरुक्त–लक्षणस्योदाहरणं भवितुमर्हति न वा ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ङ) अधो लिखितेषु उद्धरणेषु कानि कानि लक्षणानि कथमापतन्ति ? सविस्तरं लिखत (अभ्यास-पुस्तिका प्रयोक्तव्या)

(१) भाषा सन्त्यस्माकमनेकाः
जातानि यथास्वं किन्त्वेकम्
नेपालित्वं पुष्पवदङ्कित-
केतनमाश्रितमस्त्यस्माकम् !

(२) स सेनां महतीं कर्षन्पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥

(३) शशाम वृष्ट्याऽपि विना दवाग्नि-
रासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्वेष्वधिको ववाधे
तस्मिन् वनं गोप्तरि गाहमाने ॥

(च) अधोलिखित-लक्षणानामुदाहरणीकृत्य वाक्यरचनां कुरुत-

(१) अक्षर-संहतिः
(२) शोभा
(३) कार्यम

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काव्य–गुणाः

"यथा मनुष्ये शौर्यसाहसभीरुत्वादयो गुणा आत्मधर्मा भवन्ति तथैव काव्ये माधुर्य-प्रसादादयो रसधर्मा गुणाः कथ्यन्ते।" काव्यस्याऽऽत्मा रस इति साहित्यकानां मतम्। अत एव काव्यात्मनो रसस्योत्कर्षकवैशिष्ट्यं गुणः कथ्यते। यद्यपि गुणानां सम्बन्धो रसेन सह भवति, तथापि शब्दार्थमाश्रित्य एव तेषां प्रयोग इति गुणा द्विविधा भवन्ति – (१) शब्द-गुणाः (२) अर्थगुणाश्चेति। ये गुणाः शब्दाश्रयिणस्ते शब्दगुणाः, ये च अर्थाश्रयिणस्ते अर्थगुणा इति सामान्यतोऽनयोः परस्परं भेदः प्राचीनैः साहित्यिकैः स्वीकृतोऽस्ति। प्राचीनैः साहित्यिकैः गुणानां संङख्या बहुधा निर्धारिता अस्ति। केषाञ्चित् मते दशगुणाः, भोजमते च पुनः चतुर्विंशतिर्गुणाः भवन्ति। परन्तु "काव्यस्य आत्मा रसः" इति मन्यमानाः साहित्यिकाः (१) माधुर्यम् (२) ओजः (३) प्रसाद इति त्रीनेव गुणान् स्वीकुर्वन्ति। अन्ये तु एतेषु एवाऽवशिष्टानां गुणानामन्तर्भावो भवतीति विचारयन्ति। अद्यत्वे मतमिदं सरलं सुस्पष्टं काव्यमर्मस्पर्शि च मन्यते।

गुणो रसोचित–वर्णव्यवस्थाऽपि वक्तुं शक्यते। यदि श्रृङ्गारे कठिना वर्णा वीरे च कोमलाः स्युस्तर्हि शिरस्त्राणं पादलग्नमिव उपानहौ च शिरसि परिहिते इव हास्यास्पदं भवति इति वर्णानां शोभाकारितया प्रयोग–कौशलं रचना–चारुत्वं च गुणस्य तात्पर्यं काव्ये।

काव्यसमीक्षकाः सहृदयाश्च काव्यास्वादनस्य अवसरे मनसा तिस्र एव अवस्थाः स्वीकुर्वन्ति — (१) द्रुतिः (२) दीप्तिः (३) व्याप्तिः, इति। मनसो द्रुतिर्माधुर्यम्, दीप्तिः ओजः, व्याप्तिः प्रसाद इति आधुनिका त्रीनेव गुणान् स्वीकुर्वन्ति। एवं प्राचीनैः स्वीकृताना-मन्येषामपि गुणानां तेषु एव अन्तर्भावो भवतीति आधुनिकानां विदुषां विचारः स्फुटः। तत्र भरतमुनिना अपि स्वनाट्यशास्त्रे दश एव गुणाः प्रतिपादिताः सन्ति –

(१) श्लेषः (२) प्रसादः (३) समता (४) समाधिः (५) माधुर्यम् (६) ओजः (७) सौकुमार्यम् (८) अर्थव्यक्तिः (९) उदारता (१०) कान्तिश्चेति। चन्द्रालोके जय–देवेनाऽपि इमे एव गुणाः स्वीकृताः। एतेषां लक्षणोदाहरणे चेह चन्द्रालोकमतेनाऽधः क्रमतः प्रस्तूयेते –

(१) श्लेषः–

श्लेषो विघटमानार्थघटमानत्ववर्णनम्।
स तु शाब्दः सजातीयैः शब्दैर्बन्धः सुखावहः॥
॥१॥

उल्लसत्तनुतां नीतेऽनन्ते पुलककण्टकैः।
भीतया मानवत्यैव श्रियाऽश्लिष्टं हरिं स्तुमः॥
॥२॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) प्रसादः–

यस्मादन्तः स्थितः सर्वः स्वयमर्थोऽवभासते ।
सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ।।
।।३।।

(३) समता–

समताल्पसमासत्वं वर्णाद्यैस्तुल्यताऽथ वा ।
श्यामला कोमला वाला रमणं शरणं गता ।।
।।४।।

(४) समाधिः–

समाधिरर्थमहिमा लसद्धनरसात्मना ।
स्यादन्तर्विशता येन गात्रमङ्कुरितं सताम् ।।
।।५।।

(५) माधुर्यम् –

माधुर्यं पुनरुक्तस्य वैचित्त्यं चारुतावहम् ।
वयस्य ! पश्य पश्यास्याश्चञ्चलं लोचनाञ्चलम् ।।
।।६।।

(६) ओजः–

ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाऽतिभूयसः ।
रिपुं हत्वा यशः कृत्वा त्वदसिः कोशमाविशत् ।।
।।७।।

(७) सौकुमार्यम् –

सौकुमार्यमपारुष्यं पर्यायपरिवर्तनात् ।
स कथाशेषतां यातः समालिङ्ग्य मरुत्सखम् ।।
।।८।।

(८) उदारता –

उदारता तु वैदग्ध्यमग्राम्यत्वात् पृथङ्मता ।
मानं मुञ्च प्रिये किञ्चिल्लोचनान्तमुदञ्चय ।।
।।९।।

(९) कान्तिः, (१०) अर्थव्यक्तिश्च –

श्रृङ्गारे च प्रसादे च कान्त्यर्थव्यक्तिसंग्रहः ।
अमी दश गुणाः काव्ये पुंसि शौर्यादयो यथा ।।
।।१०।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास—प्रश्नावली

(क) पञ्चषपङ्क्तिभिः उत्तरं देयम्–

(१) गुणपरिभाषा ।

(२) शब्दश्लेषः ।

(३) माधुर्यस्य लक्षणमुदाहरणञ्च ।

(ख) शुद्धाभिधानेषु ईदृशं चिह्नं (√) देयम्–

(१) भरतेन नाट्यशास्त्रे दशगुणाः प्रतिपादिताः सन्ति ।

(२) आधुनिकाः समीक्षकाः गुणाः दश इति वदन्ति ।

(३) अर्थस्य प्रौढिः महतोऽर्थस्य संक्षेपो वा ओजः ।

(४) कान्तेर्गुणस्य श्रृङ्गाररसे अन्तर्भाव इति जयदेवमतम् ।

(ग) समूहद्वये सम्बन्धं निरूपयत–

"क" समूहः	"ख" समूहः
(१) माधुर्यम्	(१) पर्यायपरिवर्तनेन अकाठिन्यम्
(२) अल्पसमासो वर्णादीनां तुल्यता वा	(२) द्रुतिः
(३) सौकुमार्यम्	(३) समता

(घ) रिक्तं स्थानमुचितैः शब्दै पूरणीयम्–

(१) रसस्योत्कर्षक–धर्माः..........।

(२) .... प्रसादो गुणः ।

(३) अर्थव्यक्तेः प्रसादस्य चाभेदादर्थव्यक्तेः......................एवान्तर्भावः ।

(ङ) अधो लिखितेषु उद्धरणेषु को गुणः ? कथमापतति ? सावधानं पठित्वा लिखत

(१) कौशिकी गण्डकी प्रमुखाः स्रोतस्विन्यो हिमालयात् निःसरन्ति ।
अन्तर्बहिःस्वच्छः सदा आर्द्रं एष हिमालयः चरान् अचरांश्च सदा सरसीकरोति ।

(२) संग्रास्तुमुलस्तस्य पाश्चात्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ।।

(३) सा काली पश्चिमतो वहति
पूर्वस्यां सा मेची वहति
तेनाऽस्माकं वनभू हरिता
वन्यैः पशुभिर्व्याप्ता भवति ।

(४) पश्य पश्य! अयमेव नो नेपालः !

(च) संक्षेपेण उत्तरं देयम् –

(१) माधुर्य–सौकुमार्ययोः का भिन्नता ?

(२) 'मानं मुञ्च प्रिये किञ्चिल्लोचनान्तमुदञ्चय' इति कवितायां कथं कस्य गुणस्य समन्वयो भवति ?

(३) ओजः–प्रसादयोः परिभाषायास्तुलनया द्वयोः कः भेदः प्रतीयते ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अलङ्कारः

परिभाषा–

"अलङ्कारश्च रसस्योत्कर्षाधायकं काव्यस्य बाह्यमङ्गमनुप्रासोपमादिक" मिति काव्यलक्षणाऽवसरे एवालङ्कारः सामान्येन परिभाषितोऽस्ति । परिभाषा–विषये चन्द्रालोके जयदेवः स्वमतमेवं प्रस्तौति अधस्तन-पद्येन–

"शब्दार्थयोः प्रसिद्धचा वा कवेः प्रौढिवशेन वा ।
हारादिवदलङ्कारः सन्निवेशो मनोहरः ।।१।।"

अर्थात् यथा समुचित–प्रकारेण परिहितमेव हारादि विभूषणं कथ्यते तथैव कवेः प्रसिद्धचा वा तस्य परिपक्वया कल्पनया समुचितः शब्दार्थयो र्मनोहरः सन्निवेश एवाऽलङ्कारः कथ्यत इति जयदेवाशयः ।

यथा कटककुण्डलादीनि हारादीनि च विभूषणानि समुचित–प्रकारेण परिहितानि एव शरीरस्य सौन्दर्यं वर्धयन्ति शरीरादतिरिक्तस्याऽऽत्मनो धर्मांश्च उत्कर्षयन्ति, तथैव अनुप्रासोपमादयोऽपि समुचितप्रकारेण सन्निविष्टा एव शब्दार्थशरीरस्य काव्यस्य सौन्दर्यं वर्धयन्ति शब्दार्थातिरिक्तं काव्यात्मानं रसं चोत्कर्षयन्ति । अत एव निष्कर्षः समायाति–काव्यशोभाया वर्धको रसस्योत्कर्षकश्च काव्यधर्मोऽलङ्कारः, इति ।

हारादयो यथा प्रत्यक्षत एव बाह्यशरीरशोभावर्द्धनं कुर्वन्ति तथैव अनुप्रासोपमादयोऽपि काव्यशोभां प्रथमं शब्दार्थमाध्यमेन प्रकुर्वन्तीति सामान्येन अलङ्कारः काव्यस्य बाह्यमङ्गं कथ्यते ।

वर्गीकरणम्-

उक्तलक्षणलक्षितोऽलङ्कारश्च (क) यदि शब्दगतः स्यात्तदा शब्दालङ्कारः कथ्यते (ख) यदि चार्थगतस्तदाऽर्थालङ्कारः कथ्यते । शब्दालङ्कारेषु छेकानुप्रासादीनामष्टानामिह लक्षणोदाहरणे प्रस्तूयेते । अर्थालङ्कारेषु च पुनरुपमादीनामलङ्काराणां शतमत्र लक्षणोदाहरणमुखेन प्रस्तूयते । लक्षणोदाहरणयोः सङ्कलनं प्रत्यलङ्कारमादौ चन्द्रालोकस्य मतेन कृतमस्ति । आवश्यकेषु स्थलेषु उदाहरणान्तराणि काव्यग्रन्थेभ्यः सङ्कलितानि सन्ति । शब्दार्थालङ्कारयोर्मध्ये आदौ शब्दालङ्कारास्तत्पश्चादर्थालङ्काराः क्रमेण प्रस्तुताः सन्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शब्दालङ्काराः

यस्यां कवितायां वर्णसमुदायस्य प्रयोगे समानः प्रायःसमानो वा आवृत्तिक्रमो भवति तत्र शब्दालङ्कारः आपतति । अत एव वर्णसमुदायस्य अनेकधा आवृत्तौ सत्यामनुप्रासो नाम शब्दालङ्कारो भवतीति समीक्षकाणां मतं प्राप्यते । वर्णप्रयोगकौशलेन घटितेषु शब्दालङ्कारेषु मध्ये आदौ–

(१) छेकानुप्रासः–

स्वरव्यञ्जनसंदोहव्यूहा मन्दोहदोहदा ।
गौर्जगज्जाग्रदुत्सेका छेकानुप्रासभासुरा ।।२।।

(२) वृत्त्यनुप्रासः–

आवृत्तवर्णसंपूर्णं वृत्त्यनुप्रासवद्वचः ।
अमन्दानन्दसन्दोहस्वच्छन्दास्पन्दमन्दिरम् ।।३।।

उदाहरणान्तरं यथा–
श्रियः पतिः श्रीमति शाशितुं जग–
ज्जगन्निवासो वसुदेवसद्मनि ।
वसन् ददर्शावतरन्तमम्बरा–
द्धिरण्यगर्भाङ्गभुवं मुनिं हरिः ।।१।।
(शिशुपालवधम्, सर्गः–१)

(३) लाटानुप्रासः–

लाटानुप्रासभूर्भिन्नाभिप्राया पुनरुक्तता ।
यत्र स्यान्न पुनः शत्रोर्गर्जितं तज्जितं जितम् ।।४।।

(४) स्फुटानुप्रासः–

श्लोकस्यार्धे तदर्धे वा वर्णावृत्तिर्यदि ध्रुवा ।
तदा मता मतिमतां स्फुटानुप्रासता सताम् ।।५।।

(५) अर्थानुप्रासः–

उपमेयोपमानादावर्थानुप्रास इष्यते ।
चन्दनं खलु गोविन्दचरणद्वन्द्व वन्दनम् ।।६।।

(६) पुनरुक्तप्रतीकाशः–

पुनरुक्तप्रतीकाशं पुनरुक्तार्थसन्निभम् ।
अंशुकान्तं शशी कुर्वन्नम्बरान्तमुपेत्यसौ ।।७।।

(७) यमकम्–

आवृत्तवर्णस्तबकं स्तवकन्दाङ्कुरं कवेः ।
यमकं प्रथमा धुर्यमाधुर्यवचसो विदुः ।।८।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी – यमकालङ्कारे "डलयोरलयोर्बवोः। शषयोर्नणयोश्चान्ते सविसर्गाविसर्गयोः।।" सानुस्वारनिरनुस्वारवर्णयोश्च भेदो न भवतीति अस्मानानामेतेषामावृत्तावपि यमकालङ्कार एव भवति ।

अत्रोदाहरणान्तरं यथा–

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ।।३६।।
(किरातार्जुनीयम्, गर्गः–१)

(८) चित्रम्– काव्यवित्प्रवरैश्चित्रं खड्गवन्धादि लक्ष्यते ।
तेष्वाद्यमुच्यते श्लोकद्वयी सज्जनरञ्जिका ।।९।।
कामिनीव भवत्खड्गलेखा चारुकरालिका ।
काश्मीरसेका रक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता ।।१०।।

टिप्पणी– चित्रालङ्कारस्य खड्गबन्ध–मुरजबन्ध–हलबन्धादीनामनेके भेदा भवन्ति। चित्रालङ्कारस्य अनेकानि उदाहरणानि किरातार्जुनीय–शिशुपालवधादिमहाकाव्येषु प्राप्यन्ते ।

तत्र खड्गबन्धोदाहरणमुपर्युक्तौ श्लौकावेव । चित्रे तयो र्बन्धो यथा–



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास-प्रश्नावली

(क) अधस्तनेषु विषयेषु एकैकं निबन्धं लिखत–

(१) अलङ्कारस्य परिभाषा ।

(२) यमकालङ्कारस्तस्य वर्णावृत्तिनियमे विशेषता च ।

(३) अलङ्कारस्य भेदाः ।

(ख) अधस्तनाः प्रश्नाः समाधेयाः–

(१) लाटानुप्रास–यमकयोः परपरं को भेदः ?

(२) छेकानुप्रासार्थानुप्रासयो र्भेदरेखा का ? कस्मिन्नलङ्कारे उपमेयोपमानयोर्ज्ञानमपि अत्यावश्यकं भवति ? स्फुटं लिखत ।

(३) "छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ।।"
इति श्लोके कश्चित् शब्दालङ्कारः समन्वितो भवति न वा ? लक्षणमुल्लिख्य समाधत्त ।

(४) अधीतेषु शब्दालङ्कारेषु कोऽलङ्कारो भवते रोचते ? सोदाहरणं लिखत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अर्थालङ्काराः

वर्णप्रयोगमनपेक्ष्य अर्थमात्रस्य चमत्कारेण येऽलङ्कारा आपतन्ति, तेऽर्थालङ्काराः कथ्यन्ते। उपमेयोपमा–नन्वय–प्रतीप–स्मरण–रूपक–सन्देहोत्प्रेक्षाऽपह्नुति–तुल्ययोगिता–दीपक–प्रतिवस्तूपमा–दृष्टान्त–निदर्शना –व्यतिरेक–समासोक्ति–श्लेषाऽप्रस्तुतप्रशंसादीनामर्थालङ्काराणां बीजमुपमाऽलङ्कार एव भवतीति अर्थालङ्कारेषु उपमालङ्कारस्य विशिष्टं महत्त्वमस्ति। अतो लक्षणीयेषु अर्थालङ्कारेषु मध्ये प्रथममुपमा एव प्रस्तूयते।

१. (क) उपमा–

"उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः।" अर्थात् यत्र (क) उपमेयम् (ख) उपमानम् (ग) साधारण–धर्मः (घ) वाचक–शब्दश्च प्रयुज्यन्ते तत्रोपमालङ्कारः। अस्याऽलङ्कारस्योद्देश्यं सदृशयोः कयोरपि द्वयोः वस्तुनोः (पदार्थयोः) तुलना भवति। अत एवाऽलङ्कार–प्रसङ्गेषु–

(क) उपमेयमिति तुलनीयं यत्किञ्चिदपि वस्तु गृह्यते। उपमेयं वर्ण्यमानं प्रकृतमिति चोच्यते। इदं प्रसङ्गप्राप्तं भवति।

(ख) येन वस्तुना परिभाषितस्य उपमेयस्य तुलना क्रियते तदुपमानम्। उपमानमुपमेयतः प्रसिद्धं साधारण–धर्मस्य मूलमायतनं च भवति। तथा चोपमानमवर्ण्यमप्राकृतं च कथ्यते। इदमप्रासङ्गिकमर्थात् प्रसङ्गाऽप्राप्तं भवति।

(ग) साधारण–धर्मश्च उपमेये उपमाने च सामान–रूपेण स्थितो (प्राप्यः) गुणः। अयं हि गुणः (धर्मः) उपमेयस्याऽपेक्षया उपमाने प्रसिद्धो भवति।

इतोऽवसीयते यद् यस्मिन्नलङ्कारे किञ्चित् प्रासङ्गिकं वस्तु अप्रासङ्गिकेन वस्तुना सह साधारण–धर्ममादाय तुल्यते तत्रोपमालङ्कारो भवतीति।

यत्र–चोक्तानामुपमेयादीनां चतुर्णामिव पदार्थानामुल्लेखो भवति सा पूर्णोपमाऽपि कथ्यते। उदाहरणं यथा–

"हंसीव कृष्ण ते कीर्तिः स्वर्गङ्गामवगाहते ।।६।।"

अत्र (क) उपमेयं, कीर्तिः (ख) उपमानं, हंसी (ग) 'इव' वाचक–पदम् (घ) स्वर्गङ्गावगाहनं च साधारणो धर्म इति उपमालङ्कारस्य लक्षणं समन्वेति।

वाक्ये उदाहरणान्तरं यथा–

"अस्माकं कविशिरोमणिर्लेखनाथः महाकविः कालिदास इव सफलः कविरासीत्" इति भवितुं शक्नोति। अत्र उपमेयं लेखनाथः, उपमानं कालिदासः, 'इव' वाचक–पदम्, 'सफलः, इति चोभयनिष्ठतया साधारणो धर्मः। अत एवेदं वाक्यमुपमा पूर्णोपमा वेति संक्षेपः।

टिप्पणीः–इव–वत्–वा–यथा–समानाः शब्दा उपमालङ्कारस्य वाचक–पदानि कथ्यन्ते। समान–शब्देन चाऽत्र तुल्य–सन्निभ–संकाश–निकाश–प्रतीकाशादयः समानार्थवाचिनो ज्ञातव्याः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ख) लुप्तोपमा–

उपमालङ्कारप्रसङ्गे उक्तेषु चतुर्षु पदार्थेषु मध्ये एकस्य, द्वयोस्त्रयाणामेव वा पदार्थानामभावेऽपि यत्रोपमानोपमेययोः सादृश्यबोधो भवति तत्र लुप्तोपमाऽलङ्कारः । अस्य अष्टौ भेदाः भवन्ति ।

तद्यथा–

(१) वाचकशब्दलुप्ता
(२) साधारणधर्मलुप्ता
(३) साधारणधर्म–वाचकशब्दोभयलुप्ता
(४) वाचकशब्दोपमेयलुप्ता
(५) उपमानलुप्ता
(६) वाचकशब्दोपमानलुप्ता
(७) साधारण धर्मोपमानलुप्ता
(८) साधारण धर्म–वाचक–शब्दोपमानलुप्ता चेति ।

अस्य लुप्तोपमालङ्कारस्य विषये चन्द्रालोके जयदेवस्य मतमधः प्रस्तुतमस्ति–

वर्ण्योपमानधर्मणामुपमावाचकस्य च ।
एकद्वित्र्यनुपादानैर्भिन्ना लुप्तोपमाष्टधा ।।७।।
तडिद्गौरीन्दुतुल्यास्या कर्पूरन्ती दृशोर्मम ।
कान्त्या स्मरवधूयन्ती दृष्टा तन्वी रहो मया ।।८।।
यत्तया मेलनं तत्र लाभो मे यश्च तद्रतेः ।
तदेतत्काकतालीयमवितर्कितसम्भवम् ।।९।।

(२) अनन्वयः–

उपमानोपमेयत्वं यदेकस्यैव वस्तुनः ।
इन्दुरिन्दुरिव श्रीमानित्यादौ तदनन्वयः ।।१०।।

(३) उपमेयोपमा–

पर्यायेण द्वयोस्तच्चदुपमेयोपमा मता ।
धर्मोऽर्थ इव पूर्णश्रीरर्थो धर्म इव त्वयि ।।११।।

(४) प्रतीपम्–

प्रतीपमुपमानस्योपमेयत्वप्रकल्पनम् ।
त्वल्लोचनसमं पद्मं त्वद्वक्त्रसदृशो विधुः ।।१२।।

(५) रूपकम्–

विषय्यभेदताद्रूप्यरञ्जनं विषयस्य यत् ।
रूपकं तत्त्रिधाधिक्यन्यूनत्वानुभयोक्तिभिः ।।१७।।
अयं हि धूर्जटिः साक्षाद्येन दग्धाः पुरः क्षणात् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदाहरणान्तरं यथा —

चूताङ्कुरास्वादकषायकण्ठः पुंस्कोकिलो यन्मधुरं चुकूज ।
मनस्विनीमानविघातदक्षं तदेव जातं वचनं स्मरस्य ।।३२।।
(कुमारसम्भवम्, सर्गः–३)

अस्य षड्भेदाः भवन्ति ।

(६) परिणामः–

परिणामक्रियार्थश्चेद्विषयी विषयात्मना ।
प्रसन्नेन दृगब्जेन वीक्षते मदिरेक्षणा । ।।२०।।

उदाहरणान्तरं यथा–

वनेचराणां वनितासखानां, दरीगृहोत्सङ्गनिषक्तभासः ।
भवन्ति यत्रौषधयो रजन्यामतैलपूराः सुरतप्रदीपाः ।।१०।।
(कुमारसम्भवम्, सर्गः–१)

टिप्पणी– परिणामेऽपि रूपक इव उपमानोपमेययोरभेदारोपो भवति । किन्तु रूपके उपमानरूपेण वर्णिते वस्तु प्रसङ्गोपयोगि भवति, परिणामे उपमेयरूपेण वर्णितं वस्तु प्रसङ्गोपयोगि भवतीति द्वयोः पार्थक्यम् ।

(७) उल्लेखः –

(क) बहुभिर्बहुधोल्लेखादेकस्योल्लेख इष्यते ।
स्त्रीभिः कामोऽर्थिभिः स्वर्द्रुः कालः शत्रुभिरैक्षि सः ।।२१।।

(ख) एकेन बहुधोल्लेखेऽप्यसौ विषयभेदतः ।
गुरुर्वचस्यर्जुनोऽयं कीर्तौ भीष्मः शरासने ।।२।।

(८) स्मृतिः–

उपमानसाम्येन उपमेयस्य यत्र स्मरणं भवति तत्र स्मृतिर्नामाऽलङ्कारो भवति ।

(९) भ्रान्तिः–

सदृशवस्तुदर्शनेन तत्सदृशवस्त्वन्तरस्य भ्रमे भ्रान्तिरलङ्कारः ।

(१०) सन्देहः–

कस्मिश्चित् पदार्थे तत्सदृशपदार्थान्तरस्य सन्देहे च सन्देहालङ्कारो भवति । त्रयाणानेव लक्षणोदाहरणानि चन्द्रालोके यथा –

स्यात्स्मृति भ्रान्तिसन्देहैस्तदङ्कालङ्कृतित्रयम् ।
पङ्कजं पश्यतः कान्तामुखं मे गाहते मनः ।।२३।।
अयं प्रमत्तमधुपस्त्वन्मुखं वेत्ति पङ्कजम् ।
पङ्कजं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ।।२४।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११) शुद्धापह्नुतिः–

शुद्धापह्नुतिरन्यस्यारोपार्थो धर्मनिह्नवः ।
नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥२५॥

अस्याऽपि षड् भेदाः भवन्ति ।

(१२) उत्प्रेक्षा–

उपमेये एव उपमानारोपः (उपमानकल्पनम्) उत्प्रेक्षाऽलङ्कारः । सा च उत्प्रेक्षा इवादितद्व्यञ्जकपदानामुपादाने अगूढा अनुपादाने च गूढा भवतीति सामान्यतो द्विविधः । चन्द्रालोकेऽस्याः षड् भेदाः परिभाषिता उदाहृताश्च सन्ति । जयदेवस्य चन्द्रालोकाक्षराणी–दृशानि सन्ति–

सम्भावना स्यादुत्प्रेक्षा वस्तुहेतुफलात्मना ।
उक्तानुक्तास्पदाद्यत्र सिद्धाऽसिद्धास्पदे परे ॥३१॥
धूमस्तोमं तमः शङ्के कोकीविरहशुष्मणाम् ।
लिम्पतीव तमोऽङ्गानि वर्षतीवाञ्जनं नभः ॥३२॥
रक्तौ तवाङ्घ्री मृदुलौ भुवि विक्षेपणाद्ध्रुवम् ।
त्वन्मुखाभेच्छया नूनं पद्मैर्वैरायते शशी ॥३३॥
मध्यः किं कुचयोर्धृत्यै बद्धः कनकदामभिः ।
प्रायोब्जं त्वत्पदेनैक्यं प्राप्तुं तोये तपस्यति ॥३४॥

टिप्पणी—मन्ये, शङ्के, ध्रुवम्, प्रायः, नूनम्, यथा, इवादयः शब्दा उत्प्रेक्षायाः व्यञ्जका भवन्ति ।

(१३) रूपकातिशयोक्तिः–

उपमानवाचकशब्देभ्यः एव यत्रोपमेयस्य (प्रसङ्गप्राप्तस्य वर्णनीय–विषयस्य) बोधो भवति तत्र रूपकातिशयोक्तिः । चन्द्रालोके एतल्लक्षणोदाहरणे यथा–

रूपकातिशयोक्तिः स्यान्निगीर्याध्यवसानतः ।
पश्य नीलोत्पलद्वन्द्वान्निःसरन्ति शिताः शराः ॥३५॥

अस्याः (१) सापह्नवातिशयोक्तिः
(२) भेदकातिशयोक्तिः
(३) सम्बन्धातिशयोक्तिः
(४) अत्यन्तातिशयोक्तिः
(५) अक्रमातिशयोक्तिः
(६) चपलातिशयोक्तिरिति भेदा भवन्ति ।

११९५५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१४) तुल्ययोगिता–

(क) वर्ण्यानामितरेषां वा धर्मैक्यं तुल्ययोगिता ।
सङ्कुचन्ति सरोजानि स्वैरिणीवदनानि च ।।४३।।

(ख) हिताहिते वृत्तितौल्यमपरा तुल्ययोगिता ।
प्रदीयते परा–भूतिर्मित्रशात्रवयोस्त्वया ।।४५।।

(ग) गुणोत्कृष्टैः समीकृत्य वचोऽन्या तुल्ययोगिता ।
लोकपालो यमः पाशी श्रीदः शक्रो भवानपि ।।४६।।

(१५) (क) दीपकम्–

वदन्ति वर्ण्यावर्ण्यानां धर्मैक्यं दीपकं बुधाः ।
मदेन भाति कलभः प्रतापेन महीपतिः ।।४७।।

यत्र वर्ण्याऽवर्ण्यानामर्थादुपमेयोपमानानामेकस्मिन्नेव क्रियारूपे धर्मेऽन्वयो भवति तत्र दीपकालङ्कारः । यथोक्तोदाहरणे गज–नृपयोरुपमेयोपमानयोरेकस्मिन् क्रियारूपे 'भातीति' धर्मेऽन्वयो भवतीत्यत्र दीपकालङ्कार–समन्वयः ।

उदाहरणान्तरं यथा–
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ।।१५।।
(रघुवंशम्, सर्गः–२)

(ख) आवृत्तिदीपकम्–

त्रिविधं दीपकावृत्तौ भवेदावृत्तिदीपकम् ।
वर्षत्यम्बुदमालेयं वर्षत्येषा च शर्वरी ।।४८।।
उन्मीलन्ति कदम्बानि स्फुटन्ति कुटजोद्गमाः ।
माद्यन्ति चातकास्तृप्ता माद्यन्ति च शिखावलाः ।।४९।।

टिप्पणी– दीपकालङ्कारस्याऽऽवृत्तौ सत्यामावृत्तिदीपकम् भवति । दीपकस्या–ऽवृत्तिश्च त्रिधा भवितुं शक्नोति–

(१) धर्मबोधिकायाः क्रियाया आवृत्या
(२) अर्थमात्रस्याऽऽवृत्या
(३) क्रियाया अर्थस्य चोभयोरपि आवृत्या च ।

यथोक्तेषु उद्धरणेषु 'वर्षती' त्यत्र धर्मबोधिकायाः क्रियाया एव आवृत्तिरस्ति; 'उन्मीलन्ति' 'स्फटन्ती' त्यत्राऽर्थमात्रस्याऽऽवृत्ति रस्ति; माद्यन्ती'त्यत्र चोभयोरपि आवृत्तिरस्तीति त्रिविधस्याऽप्यावृत्तिदीपकस्योदाहरणसङ्गतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१६) प्रतिवस्तूपमा–

वाक्ययोरेकसामान्ये प्रतिवस्तूपमा मता ।
तापेन भ्राजते सूर्यः शूरश्चापेन राजते ॥५०॥

टिप्पणी– अत्र वाक्ययोरिति उपमानोपमेययोर्ग्रहणं न तु वाक्यद्वयमात्रस्य

(१७) दृष्टान्तः–

चेद्बिम्बप्रतिबिम्बत्वं दृष्टान्तस्तदलङ्कृतिः ।
त्वमेव कीर्तिमान् राजन्विधुरेव हि कान्तिमान् ॥५१॥

उदाहरणान्तरं यथा–

अणुरप्युपहन्ति विग्रहः प्रभुमन्तः प्रकृतिप्रकोपजः ।
अखिलं हि हिनस्ति भूधरं तरुशाखाऽन्तनिघर्षजोऽनलः ॥५१॥

(किरातार्जुनीयम्, सर्गः– २)

(१८) निदर्शना–

(क) वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ।
यद्दातुः सौम्यता सेयं पूर्णेन्दोरकलङ्कता ॥५२॥

(ख) पदार्थवृत्तिमप्येके वदन्त्यन्यां निदर्शनाम् ।
त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥५३॥

(ग) अपरां बोधनं प्राहुः क्रिययाऽसत्सदर्थयोः ।
नश्येद्राजविरोधीति क्षीणं चन्द्रोदये तमः ॥५४॥

(१९) व्यतिरेकः–

व्यतिरेको विशेषश्चेदुपमानोपमेययोः ।
शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः॥५६॥

उदाहरणान्तरं यथा–

नागेन्द्रहस्तास्त्वचिकर्कशत्वादेकान्तशैत्यात्कदलीविशेषाः ।
लब्ध्वाऽपि लोके परिणाहि रूपं जातास्तदूर्वोरुपमानबाह्याः ॥३६॥

(कुमारसम्भवम्, सर्गः–१)

(२०) सहोक्तिः–

सहोक्तिः सहभावश्चेद्भासते जनरञ्जनः ।
दिगन्तमगमत्तस्य कीर्तिः प्रत्यर्थिभिः सह ॥५७॥

उदाहरणान्तरं यथा–

शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥३३॥

(कुमारसम्भवम्, सर्गः–४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२१) विनोक्ति–

विनोक्तिश्चेद्विना किञ्चित्प्रस्तुतं हीनमुच्यते ।
विद्या हृद्यापि साऽविद्या विना विनयसम्पदम् ॥५८॥

(२२) समासोक्तिः–

श्लिष्टानां विशेषणां माध्यमेन यत्र वर्णनीये (उपमेये) उपमानस्याऽपि प्रतिभासो भवति तत्र समासोक्तिरलङ्कारः। चन्द्रलोके लक्षणोदाहरणे यथा–

समासोक्तिः परिस्फूर्तिः प्रस्तुतेऽप्रस्तुतस्य चेत्।
अयमैन्द्रीमुखं पश्य रक्तश्चुम्बति चन्द्रमाः ॥६०॥

उदाहरणान्तरं यथा–

अकृत्वा हेलया पादमुच्चैर्मुर्धसु विद्विषाम् ।
कथङ्कारमनालम्ब्य कीर्तिर्द्यामधिरोहति ॥५२॥

(शिशुपालवधम्, सर्गः–२)

(२३) परिकरः–

अलङ्कारः परिकरः साभिप्राये विशेषणे
सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥६१॥

उदाहरणान्तरं यथा–

भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र ! वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ॥६३॥

(रघुवंशम्, सर्गः–२)

(२४) परिकराङ्कुरः–

साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ।
चतुर्णां पुरुषार्थानां दाता देवश्चतुर्भुजः ॥६२॥

उदाहरणान्तरं यथा–

सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ॥२७॥

(रघुवंशम्, सर्गः–२)

(२५) श्लेषः–

नानार्थसंश्रयः श्लेषो वर्ण्यावर्ण्योभयाश्रितः ।
सर्वदो माधवः पायात्स यो गङ्गामदीधरत् ॥६३॥
अब्जेन त्वन्मुखं तुल्यं हरिणा हितसक्तिना ।
उच्चरद्भूरिकीलालः शुशुभे वाहिनीपतिः ॥६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२६) अप्रस्तुतप्रशंसा–

अप्रस्तुतप्रशंसा स्यात्सा यत्र प्रस्तुताश्रया ।
एकः कृती शकुन्तेषु योऽन्यं शक्रान्न याचते ।६५।।

उदाहरणान्तरं यथा–
तुल्येऽपराधे स्वर्भानु भानुमन्तं चिरेण यत् ।
हिमांशुमाशु ग्रसते तन्म्रदिम्नः स्फुटं फलम् ।।४९।।
(शिशुपालवधम्,सर्गः–२)

टिप्पणी– समासोक्तौ वर्णनीयेऽवर्ण्यस्य (उपमानस्य) प्रतिभासो भवति, अप्रस्तुतप्रशंसायां तु अवर्ण्ये (उपमाने) वर्णनीयस्य (उपमेयस्य) प्रतिभास; इति उभयोरपि परस्परं भेदः ।

(२७) प्रस्तुताङ्कुरः–

प्रस्तुतेन प्रस्तुतस्य द्योतने प्रस्तुताङ्कुरः ।
किं भृङ्ग ! सत्यां मालत्यां केतक्या कण्टकेद्धया ।।६६।।

(२८) पर्यायोक्तम्–

पर्यायोक्तं तु गम्यस्य वचो भङ्ग्यन्तराश्रयम् ।
नमस्तस्मै कृतौ येन मुधा राहुवधूकुचौ ।।६७।।

(२९) व्याजस्तुतिः–

उक्तिर्व्याजस्तुतिर्निन्दास्तुतिभ्यां स्तुतिनिन्दयोः ।।
कः स्वर्धुनि विवेकस्ते पापिनो नयसे दिवम् ।।६९।।

उदाहरणान्तरं यथा–
सम्प्रत्यसाम्प्रतं वक्तुमुक्ते मुसलपाणिना ।
निर्धारितेऽर्थे लेखेन खलूक्ता खलु वाचिकम् ।।७०।।
(शिशुपालवधम्,सर्गः–२)

(३०) व्याजनिन्दा–

निन्दाया निन्दया व्यक्तिर्व्याजनिन्देति गीयते ।
विधे स निन्द्यो यस्ते प्रागेकमेवाहरच्छिरः ।।७१।।

(३१) आक्षेपः–

(क) आक्षेपः स्वयमुक्तस्य प्रतिषेधो विचारणात् ।
चन्द्र सन्दर्शयात्मानमथवास्ति प्रियामुखम् ।।७२।।

(ख) निषेधाभासमाक्षेपं बुधाः केचन मन्वते ।
नाहं दूती तनोस्तापस्तस्याः कालानलोपमः ।।७३।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) आक्षेपोऽन्यो विधौ व्यक्ते निषेधे च तिरोहिते।
गच्छ गच्छसि चेत्कान्त तत्रैव स्याज्जनिर्मम ॥७४॥

(३२) विरोधाभासः–
आभासत्वे विरोधस्य विरोधाभास इष्यते ।
विनापि तन्वि ! हारेण वक्षोजौ तव हारिणौ ॥७५॥

(३३) विभावना–
(क) विभावना विनापि स्यात्कारणं कार्यजन्म चेत् ।
अप्यलाक्षारसासिक्तं रक्तं तच्चरणद्वयम् ॥७६॥

(ख) हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मता ।
अस्त्रैरतीक्ष्णकठिनैर्जगज्जयति मन्मथः ॥७७॥

(३४) विशेषोक्तिः–
कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे ।
हृदि स्नेहक्षयो नाभूत्स्मरदीपे ज्वलत्यपि ॥८२॥

(३५) असम्भवः–
असम्भवोऽर्थनिष्पत्तेरसम्भाव्यत्ववर्णनम् ।
को वेद गोपशिशुकः शैलमुत्पाटयेदिति ॥८३॥

(३६) असङ्गतिः–
विरुद्धं भिन्नदेशत्वं कार्यहेत्वोरसङ्गतिः ।
विषं जलधरैः पीतं मूर्च्छिताः पथिकाङ्गनाः ॥८४॥

टिप्पणी–– नेपाली भाषायां प्रचलिता "खाने पिउने रामे, चोट पाउने चामे" इत्युक्तिरसङ्गतौ समन्वेति ।

(३७) विषमम्–
(क) विषमं वर्ण्यते यत्र घटनाऽननुरूपयोः ।
क्वेयं शिरीषमृद्वङ्गी क्व तावन्मदनज्वरः ॥८७॥

(ख) विरूपकार्यस्योत्पत्तिरपरं विषमं मतम् ।
कीर्तिं प्रसूते धवलां श्यामा तव कृपाणिका ॥८८॥

(ग) अनिष्टस्याप्यवाप्तिश्च तदिष्टार्थसमुद्यमात् ।
भक्ष्याशयाहिमञ्जूषां दृष्ट्वाखुस्तेन भक्षितः ॥८९॥

उदाहरणान्तरं यथा–
क्व ? सूर्यप्रभवो वंशः क्व ? चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनाऽस्मि सागरम् ॥२॥
(रघुवंशम्,सर्गः–१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

टिप्पणी— प्रथमविषमेण सह "कहाँको राजा राम, कहाँको गने भँडारी" इत्युक्तेः सादृश्यमस्ति । तृतीयविषमस्य च "ताक परे तिवारी नत्र गोतामे" इत्युक्त्या सह सादृश्यमस्ति ।

(३८) समम्–

(क) समं स्याद्वर्णनं यत्र द्वयोरप्यनुरूपयोः ।
स्वानुरूपं कृतं सद्म हारेण कुचमण्डलम् ।।९०।।

(ख) सारूप्यमपि कार्यस्य कारणेन समं विदुः ।
नीचप्रवणता लक्ष्मीर्जलजायास्तवोचिता ।।९१।।

(३९) विचित्रम्–

विचित्रं तत्प्रयत्नश्चेद्विपरीतः फलेच्छया ।
नमन्ति सन्तस्त्रैलोक्यादपि लब्धुं समुन्नतिम् ।।९३।।

(४०) अधिकम्–

अधिकं पृथुलाधारादाधेयाधिक्यवर्णनम् ।
ब्रह्माण्डानि जले यत्र तत्र मान्ति न ते गुणाः ।।९४।।
टिप्पणी– "हत्केलाले सूर्य ढाक्नु" इति वाक्यांशेन सह अस्य सादृश्यमस्ति ।

(४१) अल्पम्–

अल्पं तु सूक्ष्मादाधेयाद्यदाधारस्य सूक्ष्मता ।
मणिमालोर्मिका तेऽद्य करे जपवटीयते ।।९६।।

(४२) अन्योन्यम्–

अन्योन्यं नाम यत्र स्यादुपकारः परस्परम् ।
त्रियामा शशिना भाति शशी भाति त्रियामया ।।९७।।
टिप्पणी—अनेन सह "माटा भर ढुङ्गो ढुङ्गा भर माटो" इत्युक्तेः सादृश्यमस्ति ।

(४३) विशेषः–

विशेषः ख्यातमाधारं विनाप्याधेयवर्णनम् ।
गतेऽपि सूर्ये दीपस्थास्तमश्छिन्दन्ति तत्कराः ।।९८।।

(४४) व्याघातः–

स्याद्व्याघातोऽन्यथाकारि तथाकारि क्रियेत चेत् ।
यैर्जगत्प्रीयते हन्ति तैरेव कुसुमायुधः ।।१०१।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(४५) कारणमाला–

गुम्फः कारणमाला स्याद्यथाप्राक्प्रान्तकारणैः ।
नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥१०३॥

उदाहरणान्तरं यथा–
विपदोऽभिभवन्त्यविक्रमं रहयत्यापदुपेतमायतिः ।
नियता लघुता निरायतेरगरीयान्न पदं नृपश्रियः ॥१४॥
(किरातार्जुनीयम्,सर्गः–२)

(४६) एकावलिः–

गृहीतमुक्तरीत्यार्थश्रेणिरेकावलिर्मता ।
नेत्रे कर्णान्तविश्रान्ते कर्णौ दोस्तम्भदोलिनौ ॥१०४॥

उदाहरणान्तरं यथा–
शुचि भूषयति श्रुतं वपुः प्रशमस्तस्य भवत्यलङ्क्रिया ।
प्रशमाभरणं पराक्रमः स नयापादितसिद्धिभूषणः ॥३२॥
(किरातार्जुनीयम्,सर्गः–२)

(४७) मालादीपकम्–

दीपकैकावलीयोगान्मालादीपकमिष्यते ।
स्मरेण हृदये तस्यास्तेन त्वयि कृता स्थितिः ॥१०६॥

(४८) सारः–

उत्तरोत्तरमुत्कर्षः सार इत्यभिधीयते ।
मधुरं मधु तस्माच्च सुधा तस्याः कर्ववेचः ॥१०७॥

(४९) यथासङ्ख्या–

यथासङ्ख्यं क्रमेणैव क्रमिकाणां समन्वयः ।
शत्रुं मित्रं विपत्तिञ्च जय रञ्जय भञ्जय ॥१०८॥

(५०) पर्यायः–

पर्यायो यदि पर्यायेणैकस्यानेकसंश्रयः ।
पद्मं मुक्त्वा गता चन्द्रं कामिनीवदनोपमा ॥१०९॥

(५१) परिवृत्तिः–

परिवृत्तिर्विनिमयो न्यूनाभ्यधिकयोर्मिथः ।
जग्राहैकं शरं मुक्त्वा कटाक्षात्स रिपुश्रियम् ॥१११॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५२) परिसङ्ख्या–

परिसङ्ख्या निषिध्यैकमेकस्मिन्वस्तुयन्त्रणम् ।
स्नेहक्षयः प्रदीपेषु न स्वान्तेषु नतभ्रुवाम् ।।११२।।

(५३) विकल्पः–

विरोधे तुल्यवलयोर्विकल्पालङ्कृतिर्मता ।
सद्यः शिरांसि चापान्वा नमयन्तु महीभुजः ।।११३।।

(५४) समुच्चयः–

(क) बहूनां युगपद्भावभाजां गुम्फः समुच्चयः ।
नश्यन्ति पश्चात्पश्यन्ति त्रस्यन्ति च भवद्विषः ।।११४।।

(ख) अहंप्राथमिकाभाजामेककार्यान्वयेऽपि सः ।
कुलं रूपं वयो विद्या धनं च मदयन्त्यमुम् ।।११५।।

(५५) कारकदीपकम्–

क्रमिकैकगतानां तु गुम्फः कारकदीपकम् ।
गच्छत्यागच्छति पुनः पान्थः पश्यति पृच्छति ।।११६।।

(५६) समाधिः–

समाधिः कार्यसौकर्यं कारणान्तरसन्निधेः ।
उत्कण्ठिता च तरुणी जगामास्तं त भानुमान् ।।११७।।

उदाहरणान्तरं यथा-
यत्रांशुकाक्षेपविलज्जितानां यदृच्छया किंपुरुषाङ्गनानाम् ।
दरीगृहद्वारविलम्बिबिम्बास्तिरस्करिण्यो जलदा भवन्ति ।।१४ ।
(कुमारसम्भवम्, सर्गः–१)

(५७) प्रत्यनीकम्–

प्रत्यनीकं बलवतः शत्रोः पक्षे पराक्रमः ।
जैत्रनेत्रानुगौ कर्णावुत्पलाभ्यामधःकृतौ ।।११८।।

(५८) काव्यार्थापत्तिः–

कैमुत्येनार्थसंसिद्धिः काव्यार्थापत्तिरिष्यते ।
स जितस्त्वन्मुखेनेन्दुः का वार्ता सरसीरुहाम् ।।११९।।
टिप्पणी–अस्याः "जेठा मामाको त यो गति भने कान्छा मामाको कुन गति अब ।" इत्युक्त्या सह सादृश्यं दृश्यते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५९) काव्यलिङ्गम्–

समर्थनीयस्यार्थस्य काव्यलिङ्गं समर्थनम् ।
जितोऽसि मन्दकन्दर्प मच्चितेऽस्ति त्रिलोचनः ॥१२०॥

उदाहरणान्तरं यथा–

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥५०॥
(रघुवंशम्, सर्गः–२)

(६०) अर्थान्तरन्यासः–

उक्तिरर्थान्तरन्यासः स्यात्सामान्यविशेषयोः ।
हनूमानब्धिमतरद्दुष्करं किं महात्मनाम् ॥१२१॥

उदाहरणान्तरं यथा-

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ॥१०॥
(रघुवंशम्, सर्गः–१)

टिप्पणी — काव्यलिङ्गेऽर्थान्तरन्यासे च पूर्वोक्तस्योत्तरार्धेन समर्थनं भवति । परन्तु सापेक्षसमर्थने काव्यलिङ्गं निरपेक्षसमर्थने चाऽर्थान्तरन्यास इति उभयोरपि उभयोत्र परस्परं भेदः ।

(६१) विकस्वरः–

यस्मिन्विशेषसामान्यविशेषाः स विकस्वरः ।
स न जिग्ये महान्तो हि दुर्द्धर्षाः सागरा इव ॥१२३॥

(६२) प्रौढोक्तिः–

प्रौढोक्तिरुत्कर्षाहेतौ तद्धेतुत्वप्रकल्पनम् ।
कचाः कलिन्दजातीरतमालस्तोममेचकाः ॥१२४॥

(६३) सम्भावना–

सम्भावना यदीत्थं स्यादित्यूहोऽन्यस्य सिद्धये ।
यदि शेषो भवेद्वक्ता कथिताः स्युर्गुणास्तव ॥१२५॥

(६४) मिथ्याऽध्यवसितिः–

किञ्चिन्मिथ्यात्वसिद्ध्यर्थं मिथ्यार्थान्तरकल्पनम् ।
मिथ्याऽध्यवसितिर्वेश्यां वशयेत्खस्रजं वहन् ॥१२६॥

(६५) ललितम्–

वर्ण्ये स्याद्वर्णवृत्तान्तप्रतिबिम्बस्य वर्णनम्
ललितं निर्गते नीरे सेतुमेषा चिकीर्षति ॥१२७॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(६६) प्रहर्षणम्–
(क) उत्कण्ठितार्थसंसिद्धिर्विना यत्नं प्रहर्षणम् ।
तामेव ध्यायते तस्मै निसृष्टा सैव दूतिका ॥१२८॥

(ख) वाञ्छितादधिकार्थस्य संसिद्धिश्च प्रहर्षणम् ।
दीपमुद्द्योदयेद्यावत्तावदभ्युदितो रविः ॥१२९॥
टिप्पणी –अस्याऽलङ्कारस्य "ढुङ्गो खोज्दा द्यौता मिल्यो" उत्युक्त्या सह सादृश्यमस्ति ।

(६७) विषादनम्–
इष्यमाणविरुद्धार्थसम्प्राप्तिस्तु विषादनम् ।
दीपमुद्योजयेद्यावन्निर्वाणस्तावदेव सः ॥१३१॥
टिप्पणी–अस्याऽलङ्कारस्य "चौटा खान खएको सम्धी झोलमा डुबेर मरचो" अथवा "माछा माछा भ्यागुतो" इत्याद्युक्तिभिः सह साधर्म्यमस्ति ।

(६८) उल्लासः–
एकस्य गुणदोषाभ्यामुल्लासोऽन्यस्य तौ यदि ।
अपि मां पावयेत्साध्वी स्नात्वेतीच्छति जाह्नवी ॥१३२॥

(६९) अवज्ञा–
ताभ्यां तौ यदि नस्यातामवज्ञालङ्कृतिस्तु सा
स्वल्पमेवाम्बु लभते प्रस्थं प्राप्यापि सागरम् ॥१३५॥

(७०) अनुज्ञा–
दोषस्याऽभ्यर्थनाऽनुज्ञा तत्रैव गुणदर्शनात् ।
विपदः सन्तु नः शश्वद्यासु सङ्कीर्त्यते हरिः ॥१३६॥

(७१) लेशः–
लेशः स्याद्दोषगुणयोर्गुणदोषत्वकल्पनम् ।
अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥१३७॥
टिप्पणी–"दैव ! दिएथ्यौ तिमीले एक
मीठो बोल्ने शक्तिविवेक ।
पाइरहेछु सोहीद्वारा
बन्धन गाली धम्की सारा ॥"
इति लेखनाथस्य कविताऽपि अस्यैव मनोरममुदाहरणं भवति ।

(७२) मुद्रा–
सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ।
नितम्बगुर्वी तरुणी दृग्युग्मविपुला च सा ॥१३८॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदाहरणान्तरं यथा–
उदयनवेन्दुसवर्णावासवदत्तावलौ बलस्य त्वाम् ।
पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥१॥
(स्वप्नवासवदत्तम्, अङ्कः–१)

(७३) रत्नावली–
क्रमिकं प्रकृतार्थानां न्यासं रत्नावलीं विदुः ॥
चतुरास्यः पतिर्लक्ष्म्याः सर्वज्ञस्त्वं महीपते ॥१३९॥

(७४) तद्गुणः–
तद्गुणः स्वगुणत्यागादन्यदीयगुणग्रहः ।
पद्मरागायते नासामौक्तिकं तेऽधरत्विषा ॥१४०॥

उदाहरणान्तरं यथा–
अजस्रमास्फालितवल्लकीगुणक्षतोज्वलाङ्गुष्ठनखांशुभिन्नया ।
पुरः प्रवालैरिव पूरितार्द्धया विभान्तमच्छस्फटिकाक्षमालया ॥९॥
(शिशुपालवधम्, सर्गः– १)

(७५) पूर्वरूपम्–
पुनः स्वगुणसम्प्राप्तिः पूर्वरूपमुदाहृतम् ।
हरकण्ठांशुलिप्तोऽपि शेषस्त्वद्यशसा सितः ॥१४१॥

(७६) अतद्गुणः–
सङ्गतान्यगुणानङ्गीकारमाहुरतद्गुणम् ।
चिरं रागिणि मच्चित्ते निहितोऽपि न रञ्जसि ॥१४३॥

(७७) अनुगुणः–
प्राक्सिद्धस्वगुणोत्कर्षोऽनुगुणः परसन्निधेः ।
नीलोत्पलानि दधते कटाक्षैरतिनीलताम् ॥१४४॥

(७८) मीलितम्–
मीलितं यदि सादृश्याद्भेद एव न लक्ष्यते ।
रसो नालक्षि लाक्षायाश्चरणे सहजाऽरुणे ॥१४५॥

(७९) सामान्यम्–
सामान्यं यदि सादृश्याद्विशेषो नैव लक्ष्यते ।
पद्माकरप्रविष्टानां मुखं नालक्षि सुभ्रुवाम् ॥१४६॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८०) उन्मीलितम्–

भेदवैशिष्टयोः स्फूर्तावुन्मीलितविशेषकौ ।
हिमाद्रि त्वद्यशोमग्नं सुराः शीतेन जानते ।
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ।।१४७।।

(८१) विशेषकः–

उभयोरपि उपमेयोपमानयोर्ज्ञानं केनचिद् वैशिष्टचेन भवति चेद् विशेषकाऽलङ्कारः। यथोपरिस्थ उद्धरणे ।

"लक्षिन्युदिते चन्द्रे................." इत्युदाहरणमस्यैव ।

(८२) उत्तरम्–

किञ्चिदाकूतसहितं स्याद्गूढोत्तरमुत्तरम् ।
यत्रासौ वेतसी पान्थ तत्रेयं सुतरा सरित् ।।१४८।।

(८३) चित्रम्–

प्रश्नोत्तरान्तराभिन्नमुत्तरं चित्रमुच्यते ।
के दारपोषणरताः के खेटाः किं चलं वयः ।।१४९।।

(८४) सूक्ष्मम्–

सूक्ष्मं पराशयाभिज्ञे तरसाकूतचेष्टितम् ।
मयि पश्यति सा केशैः सीमन्तमणिमावृणोत् ।।१५०।।

(८५) पिहितम्–

पिहितं परवृत्तान्तज्ञातुः साकूतचेष्टितम् ।
प्रिये गृहागते प्रातः कान्ता तल्पमकल्पयत् ।।१५१।।

(८६) व्याजोक्तिः–

व्याजोक्तिरन्यहेतूक्त्या यदाकारस्य गोपनम् ।
सखि पश्य गृहारामपरागैरस्मि धूसरा ।।१५३।।

(८७) गूढोक्तिः–

गूढोक्तिरन्योद्देश्यं चेद्यदन्यं प्रति कथ्यते ।
वृषापेहि परक्षेत्रादायति क्षेत्ररक्षकः ।।१५३।।

(८८) विवृतोक्तिः–

विवृतोक्तिः श्लिष्टगुप्तं कविनाऽविष्कृतं यदि ।
वृषापेहि परक्षेत्रादिति वक्ति ससूचनम् ।।१५४।।

(८९) युक्तिः–

युक्ति पराभिसन्धानं क्रियया मर्मगुप्तये ।
त्वामालिखन्ती दृष्ट्वान्यं धनुः पौष्यं करेऽलिखत् ।।१५५।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(९०) लोकोक्तिः–

लोकप्रवादानुकृतिर्लोकोक्तिररिति भण्यते ।
सहस्व कतिचिन्मासान्मीलयित्वा विलोचने ॥१५६॥

(९१) छेकोक्तिः–

छेकोक्तिर्यदि लोकोक्तेः स्यादर्थान्तरगर्भिता ।
भुजङ्ग एव जानीते भुजङ्गचरणं सखे ॥१५७॥

(९२) वक्रोक्तिः–

वक्रोक्तिः श्लेषकाकुभ्यामपरार्थप्रकल्पनम् ।
मुञ्च मानं दिनं प्राप्तं नेह नन्दी हरान्तिके ॥१५८॥

(९३) स्वभावोक्तिः–

स्वभावोक्तिः स्वभावस्य जात्यादिस्थस्य वर्णनम् ।
कुरङ्गैरुत्तराङ्गाक्षैः स्तब्धकर्णैरुदीक्ष्यते ॥१५९॥

उदाहरणान्तरं यथा–
मधु द्विरेफः कुसुमैकपात्रे पपौ प्रियां स्वामनुवर्तमानः ।
श्रृङ्गेण च स्पर्शनिमीलिताक्षीं मृगीमकण्डूयत कृष्णसारः ॥३६॥
(कुमारसम्भवम्, सर्गः–३)

(९४) भाविकम्–

भाविकं भूतभाव्यार्थसाक्षात्कारस्य वर्णनम् ।
अहं विलोकयेद्यापि युद्धचन्तेऽत्र सुराऽसुराः ॥१६०॥

(९५) उदात्तम्–

उदात्तमृद्धेश्चरितं श्लाघ्यं चान्योपलक्षणम् ।
सानौ यस्याऽभवेद्युद्धं तद्धूर्जटिकिरीटिनोः ॥१६१॥

(९६) अत्युक्तिः–

अत्युक्तिरद्भुतातथ्यशौर्योदार्यादिवर्णनम् ।
त्वयि दातरि राजेन्द्र याचकाः कल्पशाखिनः ॥१६२॥

(९७) निरुक्तिः–

निरुक्तिर्योगतो नाम्नामन्यार्थत्वप्रकल्पनम् ।
ईदृशैश्चरितैर्जाने सत्यं दोषाकरो भवान् ॥१६३॥

(९८) प्रतिषेधः–

प्रतिषेधः प्रसिद्धस्य निषेधस्यानुकीर्तनम् ।
न द्यूतमेतत्कितवक्रीडनं निशितैः शरैः ॥१६४॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(९९) विधिः–

सिद्धस्यैव विधानं यत्तदाहुर्विध्यलङ्कृतिम् ।
पञ्चमोदञ्चने काले कोकिलः कोकिलो भवेत् ।।१६५।।

(१००) हेतुः–

(क) हेतोर्हेतुमता सार्द्धं वर्णनं हेतुरुच्यते ।
असावुदेति शीतांशुर्मानिच्छेदाय सुभ्रुवाम् ।।१६६।।

(ख) हेतुहेतुमतोरैक्यं हेतुं केचित्प्रचक्षते ।
लक्ष्मीविलासा विदुषां कटाक्षा वेङ्कटप्रभोः ।।१६७।।

उपसंहारः–

इत्थं शतमलङ्कारा लक्षयित्वा निर्दर्शिताः ।
प्राचामाधुनिकानां च मतान्यालोच्य सर्वतः ।।१६८।।

अभ्यास—प्रश्नावली

१. अधस्तनानां प्रश्नानामुत्तरं संक्षेपेण देयम्–

(क) अर्थालङ्कारस्य परिभाषा का ?

(ख) रूपक–परिणामयोः परस्परं भेदः कः ?

(ग) काव्यलिङ्गाऽर्थान्तरन्यासयोः परस्परं पार्थक्यम् किम् ?

२. अधोलिखिता अलङ्काराः सोदाहरणं व्याख्येयाः–

(क) उपमा

(ख) उत्प्रेक्षा

(ग) रूपकम्

(घ) समासोक्तिः

(ङ) प्रतीपम्

३. उद्धृतेषु अधस्तनेषु श्लोकेषु केषामलङ्काराणां कथं समन्वयो भवति ? स्वकीयैः शब्दैर्लक्षणमुल्लिख्य समन्वयं दर्शयत–

(क) सा काली पश्चिमतो वहति
पूर्वस्यां सा मेची वहति
तेनाऽस्माकं वनभू हरिता
वन्यैः पशुभिर्व्याप्ता भवति ।

(ख) मन्दः कवियशः प्रार्थी गमिष्यामुपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपाधि सन्धि–दूषणानि ॥

४. अधस्तनेषु वाक्येषु समन्वेतव्या अलङ्कारा लक्षणीयाः–

(क) लेखनाथः कालिदास इव ख्यातनामा कविरासीत् ।
(ख) ऋतुविचारखण्डकाव्यमृतुसंहारखण्डकाव्यमिवाऽस्ति ।
(ग) ऋतुविचारखण्डकाव्यमेव नेपालस्य प्रकृतेच्छायाचित्रमिति न कश्चित् सन्देहः ।

५. उपमाप्रतीपयो रूपकोपमयोरुपमोत्प्रेक्षयोः रूपकपरिणामयोस्तुल्ययोगितादीपकयोः समासोक्त्यप्रस्तुतप्रशंसयोर्विभावनाविशेषोक्त्योः सामान्य–मीलितयोश्च परस्परं पार्थक्यमुदाहृत्य पृष्ठैकमितो निबन्धो लेखनीयः ।

६. "क" वर्गात् "ख" वर्गाच्च एकैकं गृहीत्वा सम्बद्धौ द्वौ द्वौ मेलनीयौ–

"क" वर्गः	"ख" वर्गः
(क) एकस्यैव वस्तुनो बहुभिर्बहुधा उल्लेखे	(क) विभावना
(ख) शशाम वृष्ट्याऽपि विना दवाग्निः	(ख) उल्लेखः
(ग) परिकरः	(ग) सामान्यम्
(घ) सादृश्यातिशयेनोपमेयोपमानयोरभेदे	(घ) तापं हरतु वः शिवः

७. रिक्तं स्थानमुचितैः शब्दैः (स्वकीयैः) पूरणीयम्–

(क) एकस्यैव वस्तुनः........कल्पने प्रतीपम् ।

(ख) 'बालकृष्णसमः कालिदासश्च नाटककारौ परन्तु समस्य नाट्यकलायां वीररसस्याधिकश्चमत्कारः' इति वाक्ये......अलङ्कारस्य लक्षणं समन्वेति ।

(ग) यत्र उपमेये उपमानारोप प्रसङ्गोपयोगी तत्र......यत्र च......तत्र व्यतिरेकः।

(घ) साभिप्रायविशेषणस्य रमणीय–प्रयोगे परिकरालङ्कारो भवति चेत् ......परिकराङ्कुरालङ्कारो भवति ।

८. रिक्तं स्थानं ग्रन्थाक्षरैः पूरणीयम्–

(क) उपमानोपमेयत्वं......तदनन्वयः ।
(ख) पर्यायो यदि..........संश्रयः ।
(ग) तद्गुणः स्वगुणः......स्वगुणोदयः।
(घ) हेतोर्हेतुमता..........सुभ्रुवाम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

९. रिक्तं स्थानं प्रश्नस्याऽधोदत्तेषु उचितेन पूरयत–

(क) उपमेयादीनां चतुर्णामपि पदार्थापानामुदाने..........भवति।
(क) पूर्णोपमा (ख) उपमेयोपमा (ग) अनन्वयः

(ख) उपमेयरूपेण काव्यग्रन्थेषु प्रसिद्धस्य उपमानरूपेण वर्णने......अलङ्कारो भवति ।
(क) प्रतीपम् (ख) रूपकम्

(ग) शुद्धापह्नुतिरन्यस्यारोपार्थो......।
(क) धर्मनिह्नवः (ख) वाच्यनिह्नवः (ग) धर्मसाधकः

(घ) 'लिम्पतीव तमोऽङ्गानि वर्षतीवाऽञ्जनं नभः' इत्यत्र......अलङ्कारः समन्वेति ।
(क) उपमा (ख) कैतवापह्नुतिः (ग) उत्प्रेक्षा

(ङ) ....रूपकातिशयोक्तिः ।
(क) यत्र उपमानवाचकशब्देभ्य एव उपमेयज्ञानं तत्र
(ख) उपमेयवाचकशब्देनैव उपमानबोधे
(ग) उपमेयोपमानवाचकशब्देभ्यः साधारणधर्म–ज्ञाने

(च) उपमेयोपमानयोः साधारणधर्म–बोधकशब्दस्य पृथगुपादाने......अलङ्कारो भवति ।
(क) प्रतिवस्तूपमा (ख) दृष्टान्तः (ग) निदर्शना

(छ) "लक्ष्मीप्रसादः कालिदासश्च रसिकौ कवी,परन्तु कालिदासे शृङ्गार–रसस्योद्गारः समधिकोऽस्ति" एतादृशस्थलेषु...... नामालङ्कारः समन्वेति।
(क) समासोक्ति (ख) व्यतिरेकः (ग) परिकरः

(ज) यत्राऽनेकार्थानां शब्दानां संघटनया चमत्कारपूर्णा कविता रच्यते तत्र.... अलङ्कारः
(क) श्लेषः (ख) प्रस्तुताङ्कुरः (ग) पर्यायोक्तम्

(झ) यत्र निन्दया स्तुतिः स्तुत्या च निन्दा अवगम्यते तत्र व्याजस्तुतिर्भवति चेद्........
........व्याजनिन्दा भवति।

(ञ) ....विरोधाभासो नामाऽलङ्कारः ।
(क) वस्तुतोऽविरोधेऽपि विरोधस्याऽऽभासे ।
(ख) पूर्वं विधिमुखेनोक्तस्य पश्चात् प्रतिषेधे ।

(ट) "विषं जलधरैः पीतं मूर्च्छिता पथिकाङ्गनाः। "
इत्यादिस्थलेषु......अलङ्कारो भवति ।
(क) असङ्गतिः (ख) विषमम् (ग) असम्भवः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

छन्दोभागः

(१) परिभाषा–

विद्वांसः संस्कृत–साहित्यस्य बाह्यं स्वरूपं द्विविधं मन्यन्ते–

(१) अनियन्त्रितमक्षररचनात्मकम्

(२) नियन्त्रितमक्षररचनात्मकं चेति।

आद्यं गद्य–नाम्ना लोके प्रसिद्धमन्यत् पद्य–नाम्ना ।

संस्कृते सर्वस्याऽपि वाङमयस्य उच्चारणनियमनं व्याकरणसहचरितेन शिक्षाशास्त्रेण, शब्दार्थनियमनं साहित्यशास्त्रसहचरितेन व्याकरणशास्त्रेण, वाक्यार्थनियमनं व्याकरणसहितेन साहित्यशास्त्रेण, अक्षरनियमनं च छन्दःशास्त्रेण कृतमस्ति। अतः अक्षरनियमनविधिः वर्णविन्यास–प्रकारो वा छन्दः, वर्णविन्यासविज्ञानं च छन्दःशास्त्रमिति परिभाषा समायाति। लघुगुरुप्रभृतीनामक्षराणां सङ्ख्याने स्वीकृतो विशिष्टः क्रमश्छन्द इति छन्दसां संघटनरूपा परिभाषा भवति।

(२) इतिहासः–

प्राचीनैरपि छन्दसां विचारः कृतः। पुरा अपि "छादयन्ति ह्वा एवं छन्दांसि पापात्कर्मणः" इत्याद्युल्लेखः प्राप्यते। पाणिनीयं क्रमं स्वीकुर्वाणाः साहित्यिकाः "चन्दयति=आह्लादयति इति छन्दः' इति विग्रहमङ्गीकृत्य च्छन्दसः अर्थात् पद्यस्य पठने वा पद्यकाव्यस्य आस्वादने महान् आनन्दो भवतीति स्वीकुर्वन्ति। एतावता स्वीकारेणैव पद्यकाव्यस्य स्वरूपनिर्माणे रसास्वादनविधौ च छन्दसामुपयोगो वाञ्छित इत्यपि वक्तुं शक्यते।

(३) उपयोगिता–

काव्यास्वादनस्य आनन्दं विहाय अपि छन्दसो महती उपयोगिता दृश्यते–

(१) लघुगुरु–वर्णप्रयोगे निश्चितः क्रमः छन्दसि भवति। क्रमनिश्चिततया रचना लयमयी गायने सुकरा च भवति। लयेन पठ्यं वस्तु कण्ठस्थं कर्तुं सुकरं भवति। कण्ठस्था एव विद्या विद्या कथ्यते– 'पुस्तकस्था तु या विद्या' सा समये न लाभदायिनीति प्रथमा उपयोगिता छन्दसः प्राप्यते।

(ख) कथ्यं वस्तु संक्षेपेण कथयितुं शक्यते यथा–

'वज्रादपि कठोराणि मृदूनि कुसुमादपि।
लोकोत्तराणां चेतांसि को हि विज्ञातुमर्हति।।" इति श्लोकस्य एव भावो यदि गद्ये चिन्तितोऽभिव्यक्तश्च स्यात्तर्हि पृष्टैकमितो निबन्धो भवितुं शक्नोति। अतो द्वितीया उपयोगिता भावाभिव्यक्तेः संक्षिप्तक्रिया।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) तृतीया च उपयोगिता मनोवैज्ञानिकी । मनुष्यो हि न केवलं चतुरः प्रत्युत मूकोऽपि गायति, हसति, रौति । यतः मनुष्यस्य मनसि प्रसादह्रासादयो विविधा भावाः भवन्ति, ते च भावा अवसरं प्राप्य अभिव्यक्ता भवन्ति । अतो मनसः सुखदुःखादीनां भावानां प्रकटनोपायश्च भवतीति छन्दसो महत्त्वपूर्णा उपयोगिता अस्ति । ईदृशं प्रकटनं स्वभावेनैव पद्ये (छन्दसि) भवतीत्यत्र न कस्यापि विप्रतिपत्तिः ।

(घ) विषयः–

अक्षरनियमनं छन्दःशास्त्रस्य विषय इति प्रागेवोक्तम्। अक्षरतात्पर्यमत्र स्वरवर्णः अथवा स्वरवर्णसहितमेव व्यञ्जनमस्ति । यतो हि च्छन्दःशास्त्रे हलन्त–व्यञ्जनस्य गणना एव न भवति । तथा हि हलन्तवर्णा अर्धमात्रिका भवन्ति । छन्दःशास्त्रे पूर्णमात्राया एव गणना भवति । एतादृशी मात्रा च स्वरविषया एव भवति न तु व्यञ्जन–विषया इति स्वरवर्णानां छन्दःशास्त्रे विशिष्टं महत्त्वमस्ति ।

मात्रा–शब्देन अत्र उच्चारण–कालो ज्ञायते । ह्रस्वाक्षराणामुच्चारणे यः काल आवश्यकः स एकमात्रिकः । दीर्घाक्षराणामुच्चारणे आवश्यकः कालो द्विमात्रिकः । एकमात्रिको लघुर्द्विमात्रिकश्च गुरुरिति छन्दःशास्त्रीयपरिभाषायां लघुगुरु–व्यवस्था भवति ।

(ङ) संघटना–

छन्दोमय–रचनायां वा पद्ये सामान्यतः प्रतिपद्यं चत्वारः पादा भवन्ति । श्लोकस्य चतुर्थांशो (१/४) भागश्च पादश्चरणमिति वा कथ्यते ।

(च) वर्गीकरणम्–

पद्यं च सामान्येन द्विविधं भवति (१) वृत्तम् (२) जातिरिति । वृत्तं गणनियमितं जातिर्मात्रानियमिता भवति । मात्रा प्रागुक्ता । गण–विस्तारश्चच्छात्रैः पूर्वकक्षायामधीतः । इमे एव छन्दसी गणवृत्तं मात्रावृत्तमिति च कथ्यते ।

गणवृत्तमेकाक्षरस्य पादादुपक्रम्य षड्विंशत्यक्षराणां पादं यावद् भेदवद् भवति । मात्रावृत्तमपि प्रायः द्वादशमात्राभ्य उपक्रम्य अष्टविंशतिमात्रा यावद् भिद्यत इति उभयोरपि अनेके भेदा भवन्ति ।

छन्दःशास्त्रेषु एकस्य एव च्छन्दसोऽपि बहवो भेदाः प्राप्यन्ते । छन्दसां भेद एव छन्दःशास्त्रेषु प्रस्तार इत्युच्यते । प्रस्तारस्य प्रयोग–स्थल–विषये भास्कराचार्यस्य मतमीदृशमस्ति–

"छन्दश्चित्युत्तरे छन्दस्युपयोगोऽस्ति तद्विदाम् ॥
मूषावहनभेदादौ खण्डमेरौ च शिल्पके ।
वैद्यके रसभेदीये तन्नोक्तं विस्तृतेर्भयात्" ॥

एकस्यैव च्छन्दसोऽनेके भेदाः प्रस्तारेण भवन्ति इति प्रागुक्तम् । कस्मिन् छन्दसि कियन्तः प्रस्तारा भवन्ति इति निश्चयं कर्तुं भास्कराचार्यस्याऽधःस्थं सूत्रमुपयोगि अस्ति–

"पादाक्षरमिते गच्छे गुणवर्गफलं चये द्विगुणे । समवृत्तानां सङ्ख्या ।"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कल्प्यताम्, अनुष्टुभो भेदा ज्ञातव्याः। तस्य प्रतिपादमष्टौ अक्षराणि भवन्ति। अतः अनुष्टुभः भेदसङ्ख्या = २^8 = २×२×२×२×२×२×२×२ = २५६

अथवा उष्णिग् भेदाः ज्ञातव्याः । तस्य प्रतिपादं सप्तवर्णा भवन्ति । अत उष्णिषो भेदसङ्ख्या = २^7 = २×२×२×२×२×२×२= १२८

टिप्पणी– (क) भेदान्वेषणे आधारसङ्ख्या '२' सर्वत्र स्वीक्रियते ।

(ख) वृत्तरत्नाकरादौ भेदान् बोधयितुं "अत्र वृत्तसङ्ख्या" इत्युल्लिखिता भवति ।

भेदस्येयं सङ्ख्या पादाक्षराणां लघु–गुरु–व्यवस्थया भवति । कल्प्यतां चतुरक्षरायाः प्रतिष्ठायाः प्रस्तारो विधेयः । तस्या विन्यासक्रमश्चैतादृशी भवति–

(१) SSSS = सर्वगुरुः सर्वलघुर्वा; भेदः = १

(२) ISSS
(३) SISS
(४) SSIS
(५) SSSI
= त्रिगुरुरेकलघुर्वा; भेदाः = ४

(६) IISS
(७) ISIS
(८) SIIS
(९) ISSI
(१०) SISI
(११) SSII
= द्विगुरुर्द्विलघुर्वा; भेदाः = ६

(१२) IIIS
(१३) IISI
(१४) ISII
(१५) SIII
= एकगुरुस्त्रिलघुर्वा; भेदाः = ४

(१६) IIII = सर्वलघुः; सर्वगुरुर्वा; भेदः = १

१६

अथवाऽधोदर्शित–क्रमेणाऽपि भेद–सङ्ख्या ज्ञातुं शक्यते। कल्प्यतां षडक्षराया गायत्र्याः भेदा ज्ञातव्याः । तत्राऽधोदर्शित–क्रमेण विन्यस्याऽपि यथार्थ–सङ्ख्या आयाति । तस्मिन् क्रमे पादे यावन्तो वर्णास्तत एक सङ्ख्या अधिका ग्राह्या ।

१ = सर्वगुरुभेदो वा सर्वलघुभेदः
१ ६ = पञ्चगुरुभेदा वा एकलघुभेदाः
१ ५ १५ = चतुर्गुरुभेदा वा द्विलघुभेदाः
१ ४ १० २० = त्रिगुरुभेदा वा त्रिलघुभेदाः
१ ३ ६ १० १५ = द्विगुरुभेदा वा चतुर्लघुभेदाः
१ २ ३ ४ ५ ६ = एकगुरुभेदा वा पञ्चलघुभेदाः
१ १ १ १ १ १ १ = सर्वलघुभेदो वा सर्वगुरुभेदः

अतो गायत्र्या भेद–सङ्ख्या
=६४=१+६+१५+२०+१५+६+१.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) गणसङ्ख्या

गणा अष्टौ भवन्तीति प्रागधीतम्। ते च सूत्रेणानेन परिभाष्याः—

"यमाताराजभानलसगम्" इति। अभीष्टगणाक्षरात् त्रीणि अक्षराणि यावद् गणने यानि लघूनि गुरूणि वा अक्षराणि आयान्ति तस्य गणस्य सैव परिभाषा (लघुगुरुक्रमः) भवति। कल्प्यतामादौ अस्माभिः 'यगणः' परिभाषणीयः। अर्थात् अभीष्टगणो यगणोऽस्ति। अतः सूत्राक्षरेषु य-वर्णाद् उपक्रम्य त्रीणि अक्षराणि परिगणनीयानि। एवं कृते च 'यमाता' इति वर्णसमुदाय आपतति। एतेषां लघुगुरुक्रमश्चेत्थम्— यमाता =।ऽऽ अत एव कथयितुं शक्यते यगणे आदौ एकं लघु द्वे च अन्तिमोपान्त्याक्षरे गुरुणी भवत इति। एवमेव प्रकारेण सर्वेषां गणनां परिभाषा (लघुगुरुक्रमः ज्ञातुं शक्यन्ते)

गणा अष्टौ एवेति कथं निश्चयो भवति? सप्त नव वा कथं न भवन्ति ? इति शङ्का स्वभावतो भवितुं शक्नोति। परन्तु अधोदर्शितनियमेन ततो न्यूना अधिका वा भवितुमेव न शक्नुवन्ति इति निश्चयं कर्तुं शक्यते।

कल्प्यतामादौ म-गणोऽस्ति। तस्य त्रीणि एव अक्षराणि गुरूणि भवन्ति। अतो गण-स्वरूपमीदृशं भवति म-गणः=ऽऽऽ. अस्य लघुगुरुक्रमं परिवृत्य यावत्यः अवस्थाः सम्भवन्ति तावन्त एव गणा भवन्ति ततो नाधिका न च न्यूनाः। इया अवस्थाश्चाधोदर्शित-प्रकारेण अष्टावेव भवन्तीति गणा अष्टौ इति शङ्का न भवति। गणक्रमो यथा–

(१) ऽऽऽ = मगण = सर्वगुरुः		
(२) ।ऽऽ = यगण = द्विगुरुः		
(३) ऽ।ऽ = रगणः = द्विगुरुः	एकलघुर्वा	
(४) ऽऽ। = तगण = द्विगुरुः		
(५) ।।ऽ = सगणः = एकगुरुः		
(६) ।ऽ। = जगणः = एकगुरुः	द्विलघुर्वा	
(७) ऽ।। = भगणः = एकगुरुः		
(८) ।।। = नगणः - सर्वलघुः		

अत्र यदि अन्योऽपि प्रकारः सम्भवेत्तर्हि अन्योऽपि गणभेदो भवेत्, परन्तु नैतादृशो भेदः सम्भवति अत एव गुणा अष्टावेव भवन्तीति निश्चयः।

उपर्युक्त प्रकारस्य स्पष्टार्थमत्र दृष्टान्तः आवश्यको भवति।

कल्प्यताम्– कस्मिंश्चिद् विद्यालये त्रीणि द्वाराणि सन्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१) तावत् त्रीणि एव द्वाराणि उद्घाटितानि सन्ति ।



(२) ततो वामतममेकं विहाय द्वे उद्घाटिते स्तः ।



(३) ततश्च मध्यमेकमे विहाय पार्श्वस्थे द्वे उद्घाटिते स्तः ।



(४) ततो दक्षिणतममेकमनुद्घाटितमस्ति, अन्ये द्वे उद्घटिते स्तः



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५) ततो दक्षिणतममेकमुद्घाटितमस्ति, अन्ये द्वे अनुद्घाटिते स्तः।



(६) ततो मध्यममेकमेव उद्घाटितमस्ति, अन्ये द्वे अनुद्घाटिते स्तः।

(७) ततश्च वामतममेकमुद्घाटितमस्ति, अन्ये द्वे अनुद्घाटित स्तः।



(८) अन्ते च त्रीणि एव अनुद्घाटितानि सन्ति।



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्य दृष्टान्तस्योपयोगः विद्यालयस्य गवाक्षेष्वपि कर्तुं शक्यते । अन्येऽपि दृष्टान्ता भवितुं शक्नुवन्ति । उदाहरणार्थं कान्यपि त्रीणि वस्तूनि उक्तविधिनां क्रमं परिवृत्य द्रष्टुं शक्यन्ते । इतोऽपि अधिका अवस्थास्त्रयाणामेव द्वाराणां यथा असम्भवो भवति तथैव त्रिभिरक्षरैः सम्पन्नस्य गणस्याऽपि इतोऽधिका अवस्था न सम्भवन्ति । अस्य प्रमाणं न केवलमुक्तमुदाहरणमेव अस्ति, परन्तु लोकव्यवहारे यत्र कुत्राऽपि प्राप्यत इति गणा अष्टौ एव भवन्ति ततो न अधिका न च न्यूनाः ।

एवं प्रकारेण उक्तलक्षणलक्षितेषु छन्दःसु मध्ये विंशतिश्छन्दांसि अधो लक्षणोदाहरणमुखेन प्रस्तूयन्ते । लक्षणानि (क) अत्र "वृत्तरत्नाकर"– ग्रन्थादुद्धृतानि, उदाहरणानि (ख) च काव्यग्रन्थेभ्यः सङ्कलितानि सन्ति । तत्रादौ–

(१) उपेन्द्रवज्रा

(क) उपेन्द्रवज्रा जतजास्ततो गौ ॥२९॥

ज	त	ज	ग ग
।ऽ।	ऽऽ।	।ऽ।	ऽऽ

(ख) अलं म,हीपाल, ! तव श्र,मेण; प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलन शक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥३४॥

(रघुवंशम्, सर्गः–२)

(२) उपजातिः–

यस्मिन् छन्दसि एकं पादमिन्द्रवज्रायाः (त – त – ज – ग – ग) अपरञ्चोपेन्द्रवज्रायाः (ज – त – ज – ग – ग) तत्र उपजातिर्नाम च्छन्दो भवति ।

वृत्तरत्नाकरे तस्य लक्षणं चेत्थम्–

(ख) 'अनन्तरोदीरितलक्ष्म भाजौ पादौ यदीयावुपजातयस्ताः ॥३०॥

अस्य वहवो भेदाः भवन्ति । छन्दःशास्त्रेषु उपजातेश्चतुर्दश भेदाः परिगणिताः उदाहृताश्च लभ्यन्ते । इन्द्रवज्रोपेन्द्रवज्रातिरिक्तच्छन्दसो मिश्रणेऽपि उपजातिरेव # भवति । अत्रैकविधा एव उदाह्रियते । तद्यथा–

उपेन्द्रवज्रा				इन्द्रवज्रा			
ज	त	ज	ग ग	त	त	ज	ग ग
।ऽ।	ऽऽ।	।ऽ।	ऽऽ	ऽऽ।	ऽऽ।	।ऽ।	ऽऽ

(ख) क्षतात्कि,ल त्राय,त इत्यु,दग्रः; क्षत्रस्य, शब्दो भु,वनेषु, रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ॥५३॥

(रघुवंशम्, सर्गः–२)

टिप्पणी–

इत्थं किलान्यास्वपि मिश्रितासु
स्मरन्ति जातिष्विदमेव नाम ॥३१॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इतः परं केवलं लक्षणोदाहरणयोरेव क्रमतः उल्लेखो भविष्यति, शेषो गुरुमुखाज्ज्ञेयः ।

(३) दोधकम्–

(क) दोधकवृत्तमिदं भ–भ–भाद्गौ ।।३३।।

भ भ भ ग ग

ऽ । । ऽ । । ऽ । । ऽ ऽ

(ख) या न य,यौ प्रिय,मन्यव,धूभ्यः; सारतरागमनायतमानम् ।
तेन सहेह विभर्त्ति रहः स्त्री सा रतरागमनायतमानम् ।।४५।।
(शिशुपालवधम्, सर्गः– ४)

(४) शालिनी–

(क) शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः ।।३४।।

म त त ग ग

ऽ ऽ ऽ ऽ ऽ । ऽ ऽ । ऽ ऽ

(ख) पत्तिः प,त्तिं वाह,मेयाय, वाजी नागन्नागः स्यन्दनस्थो रथस्थम् ।
इत्थं सेना वल्लभस्येव रागादङ्गेनाङ्गम्प्रत्यनीकस्य भेजे ।।२।।
(शिशुपालवधम्, सर्गः-१८)

(५) रथोद्धता—

(क) रान्नराविह रथोद्धता लगौ ।।३८।।

र न र ल ग

ऽ । ऽ । । । ऽ । ऽ । ऽ

(ख) तोषमे, त्ति वित,थैः स्तवैः, पर; स्तेच तस्य सुलभाः शरीरिभिः ।
अस्ति न स्तुतिवचोऽनृतन्तव स्तोत्रयोग्य न च तेन तुष्यसि ।।३।।
(शिशुपालवधम्, सर्गः–१४)

(६) स्वागता—

(क) स्वागतेति रनभाद् गुरूयुग्मम् ।।३९।।

र न भ ग ग

ऽ । ऽ । । । ऽ । । ऽ ऽ

(ख) तस्य ची,नसिच,यैरपि, बद्धा; पद्धतिः पदगुणात् कठिनेति ।
तां प्यधत्त शिरसा खलु माल्यै राजराजिरभितः प्रणमन्ती ।।२।।
(शिशुपालवधम्, सर्गः–२१)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(७) वंशस्थम्–

(क) जतौ तु वंशस्थमुदीरितं जरौ ।।४६।।

ज त ज र

।ऽ। ऽऽ। ।ऽ। ऽ।ऽ

(ख) उवाच, चैनं प,रमार्थ, तो हरं; न वेत्सि नूनं यत एवमात्थमाम् ।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ।।७५।।
(कुमारसम्भवम्, सर्गः–५)

(८) इन्द्रवंशा–

(क) स्यादिन्द्रवंशा ततजै रसंयुतैः ।।४७।।

त त ज र

ऽऽ। ऽ ऽ।। ऽ। ऽ।ऽ

(ख) सेनाप,तिं नन्द,नमन्ध,कद्विषो;
युद्धैः पुरस्कृत्य बलस्य शात्रवः ।
सैन्यरुपेतीति सुरद्विषां पुरो–
ऽभूत् किंवदन्ती हृदयप्रकम्पिनी ।।५।।
(कुमारसम्भवम्,सर्गः–१)

(९) तोटकम्–

(क) इह तोटकमब्धिसैः प्रथितम् ।।४८।।

स स स स

।।ऽ। ।ऽ। ।ऽ। ।ऽ

(ख) स तथे,ति विने,तुरुदा,रमतेः, प्रतिगृह्य वचो विससर्ज मुनिम् ।
तदलब्धपदं हृदिशोकघने प्रतियातमिवान्तकमस्य गुरोः ।।९१।।
(रघुवंशम,सर्गः– ८)

(१०) भुजङ्गप्रयातम्–

(क) भुजङ्गप्रयातम् भवेद्यैश्चतुर्भिः ।।५५।।

य य य य

।ऽऽ ।ऽऽ ।ऽऽ।ऽऽ

(ख) तदानीं, वजूस्था, वयोज्ञा,नवृद्धा ; विशेषेण चाऽऽमन्त्रिता आगतास्ते ।
सभामण्डपं सोभयामासुरुच्चैः शिशोर्दीर्घजीवित्वमाकाङ्क्षमाणाः ।।२।।
(श्रीकृष्णवचनामृतम्, सर्गः– १६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(११) स्रग्विणी–

रैश्चतुर्भिर्युता स्रग्विणी सम्मता ।।५६।।

र र र र

ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ

शैलतो, निर्झराः, कन्दरा, द्यौ यथा;

स्पन्दमानाः स्रवन्तीह गारोद्गमैः ।

नन्दपत्न्याः स्तनाभोगतो निःसृता

दुग्धधारास्तथाऽऽप्लावयंस्तं तदा ।।२।।

(श्रीकृष्णवचनामृतम्, सर्गः- १८)

(१२) प्रमिताक्षरा–

(क) प्रमिताक्षरा सजससैरुदिता ।।६०।।

स ज स स

।।ऽ ।ऽ।।।ऽ।।ऽ

(ख) विहगाः, कदम्व,सुरभा,विह गाः; कलयन्त्यनुक्षणमनेकलयम् ।

भ्रमयन्नुपैति मुहुरभ्रमयं पवनश्च धूतनवनीपवनः ।।३६।।

(शिशुपालवधम्, सर्गः–६)

(१३) प्रहर्षिणी–

(क) म्नौ ज्रौ गास्त्रिदशयतिः प्रहर्षिणीयम् ।।७०।।

म न ज र ग

ऽऽऽ ।।।।ऽ। ऽ।ऽऽ

(ख) निर्दिष्टां, कुलप,तिना स, पर्णशा,ला–

मध्यास्य प्रयतपरिग्रहद्वितीयः ।

तच्छिष्याध्ययननिवेदितावसानां

संविष्टः कुशशयने निशां निनाय ।।९५।।

(रघुवंशम्,सर्गः–१)

(१४) मत्तमयूरम्–

(क) वेदै रन्ध्रैर्म्तौ यसगा मत्तमयूरम् ।।७२।।

म त य स ग

ऽऽऽ ऽऽ।।ऽऽ।।ऽऽ

(ख) मुक्तं मु,क्तागौर,मिहक्षी,रमिवा,भ्रै

र्वापीष्वन्तर्लीनमहानीलदलासु ।

शस्त्रीश्यामैरंशुभिराशु द्रुतमम्भ–

श्छायामच्छामृच्छति नीलीसलिलस्य ।।४४।।

(शिशुपालवधम्,सर्गः–४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१५) मञ्जुभाषिणी–

(क) सजसा जगौ भवति मञ्जुभाषिणी ।।७४।।

स ज स ज ग

ISIS IIISISIS S

(ख) वृजतो,रपि प्र,णयपू,र्वमेक,तां
कुकुराधिनाथकुरुनाथसैन्ययोः ।
रुरुषे विषाणिभिरनुक्षणम्मिथो
गदमूढबुद्धिषु विवेकिता कुतः ।।६।।

(शिशुपालवधम्, सर्गः–१३)

(१६) पृथ्वी—

(क) जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।।९४।।

ज स ज स य लग

ISI IISISIIISIS SIS

(ख) लभेत, सिकता,सु तैल,मपि य,त्नतः पीडयन्
पिबेच्च मृगतृष्णिकासु सलिलं पिपासार्दितः ।
कदाचिदपि पर्यटञ्छशविषाणमासदये–
न्न तु प्रतिनिविष्टमूर्खजनचित्तमाराधयेत् ।।५।।

(नीतिशतकात्)

(१७) हरिणी–

(क) रसयुगहयैर्न्सौ म्रौ स्लौ गौ यदा हरिणी तदा ।।९६।।

न स म र स ल ग

III IIS SSSS ISIIS I S

(ख) वहति, भुवन, श्रेणिं शे,षः फणा, फलक, स्थितां
कमठपतिना मध्ये पृष्ठं सदा स च धार्यते ।
तमपि कुरुते क्रोडाधीनं पयोधिरनादरा–
दहह महतां निःसीमानश्चरित्रविभूतयः ।।३५।।

(नीतिशतकात्)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(१८) मन्दक्रान्ता –

(क) मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ।।९७।।

म	भ	न	त	त	ग	ग
ऽ ऽ ऽ	ऽ ।।	।।।	ऽ ऽ ।	ऽ ऽ ।	ऽ	ऽ

(ख) मौनान्मू,कः प्रव,चनप,टु र्वातु,लो जल्प,को वा;
धृष्टः पार्श्वे वसति च सदादूरतश्चाऽप्रगल्भः ।
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।।५८।।

(१९) नर्कुटकम्- (नीतिशतकात्)

(क) हयदशभिर्नजौ भजजला गुरु नर्कुटकम् ।।९८।।

न	ज	भ	ज	ज	ल	ग
।।।	। ऽ ।	ऽ ।।	। ऽ ।	। ऽ ।	।	ऽ

(ख) अपरि,मिता ध्रु,वास्तनु, भृतो य,दि सर्व,गता–
स्तर्हि न शास्यतेति नियमो ध्रुव नेतरथा ।
अजनि च यन्मयं तदविमुच्य नियन्तृ भवेत्
सममनुजानतां यदमतं मतदुष्टतया ।।३०।।
(श्रीमद्भागवतम्,दशमस्कन्धः, अध्यायः-८७)

(२०) स्रग्धरा–

(क) म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ।।१०४।।

म	र	भ	न	य	य	य
ऽ ऽ ऽ	ऽ । ऽ	ऽ ।।	।।।	। ऽ ऽ	। ऽ ऽ	। ऽ ऽ

(ख) प्राणाघा,तान्निवृ,त्तिः पर,धनह,रणे सं,यमः स,त्यवाक्यं
काले शक्त्या प्रदानं युवतिजनकथामूकभावः परेषाम् ।
तृष्णास्रोतोविभङ्गो गुरुषु च विषयः सर्वभूतानुकम्पा
सामान्यः सर्वशास्त्रेष्वनुपहतविधिः श्रेयषामेष पन्थाः ।।२६।।
(नीतिशतकात्)

अभ्यास—प्रश्नावली

१. प्रतिप्रश्नं संक्षिप्तमुत्तरं देयम्–

(क) छन्दसः परिभाषा ।

(ख) गणा अष्टावेव न तु ततो न्यूना अधिका वेति ।

(ग) 'यमाताराजभानसलगम्' इति सूत्रेण प्रतिपाद्यं गण–विवरणं गणानां लघुगुरुक्रमनिर्धारणेऽस्योपयोगिता च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२. अधोलिखित प्रश्नानां यथातथ्यमुत्तरमुदाहरणपूर्वकं देयम्–

(क) दोधक–वृत्तस्य कियन्तो भेदा भवेयुः ? कथं च ते प्रस्ताराः सिद्धयन्ति ? दृष्टान्तेन दर्शयत ।

(ख) छन्दसां प्रस्तारस्य कुत्र कुत्र उपयोगो भवति ? अनुष्टुभो दृष्टान्तेन स्पष्टं कुरुत ।

(ग) स्वतागताया लक्षणमुदाहरणे सङ्गमय्य तस्या भेदा लेख्याः ।

३. रिक्त–स्थानमुचितैः शब्दैः पूरणीयम्–

(क) पद्यम् सामन्यतो द्विविधं भवति–

(१) .. ..

(२) .. ..

(ख) गणवृत्तं .. .. उपक्रम्य .. .. अक्षरपर्यन्तं भेदवत् भवति ।

(ग) मन्दाक्रान्ताऽ .. .. ।

(घ) यदा जतजर–गणास्तत्र वंशस्थं वृत्तं यत्र च पुनः. . . .गणास्तत्र पृथ्वी ।

(ङ) चतुर्थे, षष्ठे, सप्तमे चाक्षरेषु यतिः, म–भ–न–त–त गणास्तथा द्वे गुरुणी अक्षरे चान्तिमे प्रतिपादं तत्र मन्दाक्रान्ता वृत्तं भवति यदि .. .. भवति चेत् शालिनीवृत्तम् ।

४. अधो निर्दिष्टसंकेतैः कानिच्छन्दांसि सूच्यन्ते–

(क) ऽ।ऽ, ।।।, ऽ।ऽ, ।ऽ – (क) प्रमिताक्षरा
(ख) रथोद्धता

(ख) ऽऽऽ, ।।।, ।ऽ।, ऽ।ऽ, ऽ –(क) हरिणी
(ख) प्रहर्षिणी

(ग) ।।ऽ, ।ऽ।, ।।ऽ, ।ऽ।, ऽ –(क) मञ्जुभाषिणी
(ख) स्रग्विणी

५. उद्धत–पादेषु च्छन्दो नामानि ससमन्वयं लेख्यानि–

(क) वामवाहुकृतवामकपोल–

(ख) तुषाराद्रेः सूनोरहह! पितरि क्लेशविवशे ।

(ग) रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय ।

६. समूहद्वये सम्बन्धं स्थापयत–

"क" समूहः	"ख" समूहः
(क) र–न–भ–ग–ग–गणाः	(क) स–ज–स–स–गणाः
(ख) भुजङ्गप्रयातम्	(ख) स्वागता
(ग) भ–भ–भ–ग–ग–गणाः	(ग) य–य–य–य–गणाः
(घ) प्रमिताक्षरा	(घ) दोधकम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७. शुद्धाभिधानेषु ईदृशं (√) अशुद्धाभिधानेषु चेदृशं (×) चिह्नं देयम्–

(क) 'एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च' अत्र शालिनी नाम च्छन्दः ।

(ख) स्रग्विण्यां प्रतिपादं त्रयो गणा भवन्ति ।

(ग) मत्तमयूरे प्रतिपादं चतुर्थे नवमे च अक्षरे यतिर्भवति ।

(घ) स्रग्धरावृत्ते प्रतिपादमेकविंशतिरक्षराणि भवन्ति ।

(ङ) भुजङ्गप्रयातं चतुर्भिः सगणैरपि सम्भवति ।

(च) जतौ तु वंशस्थमुदीरितं जरौ ।

८. अधो लिखितेषु लघु–गुरुषु च्छन्दो नामानि उल्लिख्य उदाहरणार्थं कविताऽपि स्वशब्दैः रचनीया– (पुस्तिका प्रयोक्तव्या)

(क) ऽ।।, ऽ।।, ऽ।।, ऽऽ.

(ख) ऽ।ऽ, ।।।, ऽ।।, ऽऽ.

(ग) ।ऽ।, ऽऽ।, ।ऽ।, ऽ।ऽ.

९. अधोलिखितश्लोकानां छन्दांसि अनुकृत्य द्वित्रान् मौलिकान् श्लोकान् रचय–

(क) प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषाण्णायां निषीदास्यां पीताम्भसि पिबेरपः ।।

(ख) विकारहेतौ सति विक्रियन्ते; येषां न चेतांसि त एव धीराः ।

(ग) प्राप्येमां कर्मभूमिं न चरति मनुजो यस्तपो मन्दभाग्यः ।

१०. अधस्तादुद्धृतां कवितां सम्यगधीत्याऽधस्तनप्रश्नानामुत्तरं देयम्–

(क) कविता–

"तस्यास्तिक्तैर्वनगजमदैर्वासितं वान्तवृष्टि–
र्जम्बुकुञ्जप्रतिहतरयं तोयमादाय गच्छेः ।
अन्तःसारं घन ! तुलयितुं नानिलः शक्ष्यति त्वां
रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय ।।"

(ख) प्रश्नाः–

(१) अत्र किं छन्दः कथमापतति ?

(२) श्लोकेऽस्मिन् कति लघूनि कति च गुरूणि अक्षराणि सन्ति ?

(३) अत्र कुत्र कुत्र यतिर्भवति ?

(४) कतिभिर्गणैः इयं कविता निर्मिता अस्ति ?

(५) अत्र यावन्तो गणा तावत्य एव मात्रा सन्ति अथवा अन्यानि हलन्तानि चाक्षराणि सन्ति ?

(६) "अनिलः" इत्यत्र द्वे लघूनि अन्तिमं च गुरु भवति इति छन्दो नियमे किं प्रमाणमस्ति ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पद्य–काव्यम्

अत्र पद्य-काव्यस्य तात्पर्यं काव्य-लक्षणैर्लक्षिता छन्दोबद्धा मनोरमा कवि-कृतिः अस्ति । काव्य-लक्षणं तु 'निर्दोषा लक्षणवती' त्यादिना सिद्धान्तखण्ड एव स्फुटम् । प्रसङ्गश्चात्र महाकाव्यस्य अस्ति । यतो हि अस्माभिः पठनीयं पद्य-काव्यं महाकाव्यांश एव । महाकाव्य-लक्षणं च काव्यशास्त्रसिद्धान्तेषु इत्थं प्रदर्शितमस्ति–

(१) कवि–कृतिः सर्गेषु विभक्ता भवति । सर्गाश्च अष्टाधिका आवश्यका भवन्ति ।

(२) एकस्मिन् सर्गे प्राय एकमेव छन्दः प्रयुज्यते, सर्गसमाप्तौ छन्दसः परिवर्तनं भवति ।

(३) महाकाव्यस्य नायकः प्रायेण कश्चित् महापुरुषो भवति । तस्य प्रकृतिश्च धीरोदात्तादिरूपा भवतीति लक्षणकाराणां मतमस्ति ।

(४) शृङ्गार–वीर–शान्तेषु कश्चित् एको रसो मुख्यः । अन्ये च रसा मुख्य–रसस्य पोषकाः उद्दीपका वा भवन्ति ।

(५) कथावस्तुनः स्रोतः प्रायेण इतिहासः पुराणं वा भवति । पुराणेतिहासस्य तात्पर्यं चात्र रामायण–महाभारतादिग्रन्थसम्बद्धमस्ति । कदाचित् काल्पनिकमपि कथावस्तु स्वीक्रियते ।

(६) उद्देश्यं च महाकाव्यस्य धर्मार्थ–काम–मोक्ष–रूपाणामन्यतमपुरुषार्थानां प्राप्तिरेव ।

(७) उद्देश्यप्राप्तये कविना स्वकृतिर्विविधाभिः सूक्तिभिः, कल्पना–चातुर्येण, भाषा–शैली–चमत्कारेण च मनोहरा शिक्षाप्रदा च कर्तुं प्रयस्यते ।

(८) कथावस्तुन उद्देश्यस्य च पुष्ट्यर्थम् आवश्यकं प्रकृतिचित्रणमपि क्रियते ।

(९) प्रारब्धस्य कार्यस्य विघ्नं विना समाप्तिर्भवतु इतीच्छया आरम्भे मङ्गलाचरणं भवति ।

(१०) कृतेर्नाम (शीर्षकम्) कवेर्नायकस्य मुख्यघटनाया वा आधारमाश्रित्य क्रियते ।

उक्तलक्षणलक्षिता कवेः कृतिः महाकाव्यं कथ्यते ।

स्वरूपतः काव्यस्य वर्गीकरणं त्रिधा क्रियते–

(१) महाकाव्यम्,

(२) खण्डकाव्यम्,

(३) मुक्तकं चेति ।

महाकाव्यमुक्तलक्षणप्रकारकमेव भवति । उदाहरणाय यथा रघुवंश–किरातार्जुनीये स्तः । द्वे अपि कृती सर्गेषु विभक्ते, सर्गाश्च अष्टाधिका एव सन्ति । सर्गान्ते छन्दः परिवर्तनं च उभयत्रापि अस्ति । नायक–रसादिलक्षणानि च उभयत्रापि समानानि सन्तीति द्वे महाकाव्ये ।

खण्डकाव्यं च उक्तलक्षणेषु प्रायेण एकं पक्षमवलम्ब्य रचितो ग्रन्थः । उदाहरणं तु महाकवेः कालिदासस्य मेघदूतं सुप्रसिद्धमस्ति ।

उक्तलक्षणविषयं विहाय रचिता रसात्मिका स्फुटरचना अपि भवितुं शक्नोतीति सा च मुक्तकरूपेण प्रसिद्धा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाकविः कालिदासः
तस्य
रघुवंश–महाकाव्यञ्च

रघुवंश–महाकाव्यस्य लेखको महाकविः कालिदासः। महा-काव्यस्य रचनाकारो महाकविर्भवतीति कालिदासो महाकविः। अस्य कवेः संक्षिप्त. परिचयश्चात्र दीयते।

भूमिका–

असौ महाकविर्विश्वसाहित्ये सुप्रसिद्धोऽस्ति। अनेन कविना रचितं "अभिज्ञान-शाकुन्तलम्' नाम नाटकं विश्वस्य समृद्धासु भाषासु अनूदितं लोके अत्यन्तं प्रियं चास्ति। अत एव अस्य जीवनस्य कृतीनां च अध्ययनं महद्भिर्विद्वद्भिरपि प्राचीन-कालादारभ्य अद्यापि क्रियमाणमस्ति। तथापि अस्य महाकवेर्विषये अनेका शङ्का विद्यन्ते एव।

कालः–

अस्य महाकवेः कालः कतमः आसीत्? इति प्रश्नस्य उत्तरविषये विदुषा-मैकमत्यं नास्ति। केचन विद्वांसः खीष्टाब्दीयं षष्ठं शतकमस्य काल इति विचारयन्ति। अस्य मतस्य स्थापकः "डा. हार्नली" नामा पाश्चात्यो विद्वान्। परन्तु अपरे केचन विद्वांस स्तस्य कालः पञ्चमी शताब्दीति विचारयन्ति। यद्यपि कालविषये विदुषां मतानि प्रायः अष्टौ प्राप्यन्ते, तथापि अस्य कवेः प्रामाणिकं जीवनवृत्तं नाद्यापि प्राप्तम्।

कालिदास–विषये रुचिं कुर्वाणा बहवो विद्वांसः कविममुं राज्ञो विक्रमादित्यस्य सभायाम् अन्यतमो विद्वानासीदिति एकमत्येन स्वीकुर्वन्ति। इतिहासे विक्रमादित्य–नामानस्त्रयो राजानःप्राप्यन्ते। तेषु इ. पू. प्रथम–शतके अन्यतम आसीत्। असौ कविरपि तस्यैव सभायाः पण्डित इति बहूनामितिहासज्ञानां विचारोऽस्ति। एतावता चास्य महाकवेः कालः (समयः) ई.पू. प्रथमशतकमिति निश्चितो भवति।

वंशः–

अस्य कवेः समय–विषये यथा मतान्तराणि तथैवाऽन्यविषयेऽपि मतान्तराणि सन्ति। यद्यपि अस्य वंशपरिचयः शून्यप्राय एवाऽस्ति, तथापि असौ ब्राह्मणवंशे जातः प्रतिभाशाली विद्वानासीदिति तु तस्य ग्रन्था एव प्रमाणम्।

अस्य विषयेऽनेकाः किंवदन्त्यः (जनश्रुतयः) प्रचलिताः सन्ति। तासु विवाह-विषयस्य कथाऽत्यन्तं रुचिरा अस्ति। सा चैतादृशी श्रूयते–

किंवदन्ती–

(क) तत्र भवान् कालिदासो विवाहात्पूर्वं महामूर्ख आसीत्। एकदा असौ राजसभा-यामुपस्थापितः। राजसभायां सभापण्डितैस्तस्य विद्वत्ताविषये महती प्रशंसा कृता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विदुष्या राजपुत्र्या सह सम्पन्ने शास्त्रार्थे सभापण्डितैः कालिदासस्य विजयो घोषितः। तथाविधं विद्वांसं प्राप्य राजा अपि प्रसन्नो भूत्वा स्वपुत्रीं च तस्मै दत्तवान्। विवाहानन्तरं राजपुत्री सर्वमपि वस्तुस्थितिं ज्ञातवती यत् तस्याः पतिः महामूर्ख इति। तज् ज्ञात्वा तया स गृहाद् बहिर्निष्काशितः। पत्न्या निर्वासितः कालिदासोऽत्यन्तं खिन्नोऽभूत्। एवं गृहान्निर्वासितः कालिदासः अप्रतिहत एव कालिका–मन्दिरं गत्वा स्वां जिह्वां छित्वा समर्पितवान्। ततः सन्तुष्टा कालिका कालिदासायाऽलौकिकीं विद्याशिषमददात्। कालिकाप्रसादादसौ कालिदासः सर्वशास्त्राणां ज्ञाता महान् कविश्च अजायत।

एवं आशिषं प्राप्य स पुनर्गृहं प्रत्यागच्छत्। यदा कालिदासः प्रत्यागतस्तदा रात्रिसमय आसीत्। गृहमागत्य स "अनावृत–कपाटं द्वारं देहि" इत्यवदत्। ततस्तस्य पत्नी तमपृच्छत्– "अस्ति कश्चिद् वाग्विशेषः?" इति। अस्योत्तरं कालिदासः संस्कृतेनैव दत्तवान्। तदुरप्रभाविता राजपुत्री सातिशयं तस्य स्वागतं कृतवती। पश्चात् कालिदासः अस्मादेव वाक्यखण्डात् प्रारम्भ– (१) कुमारसम्भवम् (२) मेघदूतम् (३) रघुवंशमिति नामानि त्रीणि काव्यरत्नानि अलिखदिति।

(ख) विक्रमादित्यस्य राज्ञो भोजस्य च प्रासादे असौ कविरपि अन्यतम आसीदिति अन्या किंवदन्ती कर्णपरम्परया प्रचलिता प्राप्यते। परन्तु भोजस्य समयः एकादशशतकं निर्धारितमस्ति। एकादश–शतके भोजसभायामन्य एव कालिदास भवितुमर्हतीति एषा किंवदन्ती सुप्रसिद्धं महाकविं कालिदासं न स्पृशति।

विश्वासः–

अस्य कवेर्धर्मो विश्वासो वा प्रायेण विशुद्धसनातनधर्मसम्मत आसीदिति तस्य काव्यग्रन्थेभ्यः प्राप्यते। रघुवंश–महाकाव्यस्य प्रथमसर्गस्य प्रथमः श्लोक एव अस्य महाकवेः तादृशं विश्वासं जनयतीति विदुषां विचारोऽस्ति।

कृतयः–

अस्य कृतिविषयेऽपि विदुषामैकमत्यं नास्ति। परन्तु सर्वेषामेव विदुषां मते इमाः कृतयः कालिदासस्यैवेति निश्चीयन्ते। (१) महाकाव्ये– (क) रघुवंशम् (ख) कुमारसम्भवम् चेति द्वे। (२) खण्डकाव्ये– (क) मेघदूतम् (ख) ऋतुसंहारं चेति द्वे। (३) रूपकेषु– (क) अभिज्ञान–शाकुन्तलम् (ख) मालविकाग्निमित्रम् (ग) विक्रमोर्वशीयम् चेति त्रीणि।

वैशिष्टचम्–

अस्य कवे र्महती विशेषताऽस्ति–

(१) उपमा–चातुर्यम्। उपमा–प्रयोगस्य कौशलं दृष्ट्वा कश्चिद् विद्वान् टिप्पणी–मलिखत्–"उपमा कालिदासस्य" इति। उदाहरणेषु तादृशानि बहूनि वाक्यानि उद्धर्तुं शक्यन्ते। यथा–

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

"सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिवरा सा ।
नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः ।।

पद्यभागस्य पठनावसरे अन्यान्यपि उदाहरणानि प्राप्स्यन्ते ।

(२) कल्पना- चातुर्यम् ।

(३) प्रकृति-चित्रणम् ।

(४) श्रृङ्गारकरुणयोर्हृदयग्राहि वर्णनम् ।

(५) सरला प्रसादमयी शैली चास्य विशेषतासु पठचन्ते ।

एवं कालिदासस्य कवेः परिचयो विश्व-साहित्येषु, इतिहास-पुस्तकेषु च प्रमुखं स्थानं गृह्णाति ।

(ख) कालिदासस्य महाकाव्येषु रघुवंश-महाकाव्यं सरलं, सरसं, सुमनोहरञ्चास्ति । अस्य कथावस्तु सूर्यवंश्यानां नृपाणां वंशक्रममादाय विकसति । दिलीप-रघु-अज-दशरथ-रामादीनां नायकानां चरित्रमादाय प्रारब्धं कथावस्तु अग्निवर्णपर्यन्तं गच्छति । अस्य महाकाव्यस्य प्रथमसर्गे -

दिलीपचरित्रमन्तिमसर्गे च अग्निवर्ण-चरित्रं चित्रितमस्तीति कथावस्तुनः स्रोतः पुराणेतिहासौ एव ।

अस्य महाकाव्यस्य भाषा सरला, स्वाभाविकी, अलङ्कृता चास्ति । प्रायशः प्रसादो गुणः पाश्चाली वैदर्भी वा रीतिः (शैली), रसश्च श्रृङ्गारवीरकरुणादिर्यत्र कुत्रापि प्राप्यन्ते ।

अस्मिन् महाकाव्ये समसामयिकी एव धारणा नास्ति, परन्तु सार्वकालिकी धारणा प्रतिबिम्बिता अस्ति । अस्माकमार्याणां सभ्यता, संस्कृति-संस्कारौ, धर्म-विश्वासौ, सामाजिकी स्थितिः, जीवन-दर्शनम्, राष्ट्र-प्रेम, प्रकृति-चित्रणम्,नीति-रीति, व्यक्तिगत-कर्तव्यम्, राष्ट्रिय-कर्तव्यम्, अध्यात्मदर्शनम्, भौतिक-कर्तव्यं च समीचीनतया अत्र प्रतिबिम्बितं प्राप्यते । अतोऽप्यधिकं मानवानामान्तरिकी सन्तुष्टिरपि प्राप्यते, काव्यास्वादनेन विलक्षणश्चमत्कारानुभवश्च सम्यग् भवतीति रघुवंश-महाकाव्यं कालिदासकृतिषु अत्यन्तं रुचिकरमस्ति ।

कालिदासस्य समीक्षकाः रघुवंश-महाकाव्यस्य प्राणभूता विशेषता राजचरित्रस्य चित्रणमेवेति मन्यन्ते । तेषां मते महाकविरादौ दिलीपचरित्रं ततो रघुचरित्रं च ग्रन्थे समाविश्य क्रमेण रामचरित्रमादर्शमयमनुकरणीयमुदाहरणीयं च प्रतिपादितवान् । महाकाव्यस्य इमे चरितनायकाः प्रजाया हितं वाञ्छन्तः स्वधर्ममपि रक्षन्तः सुशासनमकुर्वन् । परन्तु अस्मिन् रघुकुले एव अन्तिमो राजा अग्निवर्ण-नामा आसीत् । स पूर्वजैः पालितं स्वधर्मं शासनमार्गं च अत्यजत् । निरङ्कुशः, स्वेच्छाचारी अपि अजायत । अत एव तस्य राज्ये सर्वत्र अव्यवस्था, आतङ्कः, सन्त्रासश्च अजायत ।

एवं धर्मच्युतोऽग्निवर्णो रघुकुलस्य कलङ्करूपः सञ्जातः तस्यैव परिणामस्तादृशोऽभूत् येन स राजा परम्पराच्युतः राज्यादपि भ्रष्ट इति राजकर्तव्यमेव राजकुलं रक्षतीति उपयोगिनी शिक्षा अपि अस्मिन् महाकाव्ये सविस्तरं वर्णितमस्तीति अस्य संक्षेपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथम–सर्गस्य

कथासारः

प्रथम–सर्गो रघुवंशमहाकाव्यस्य प्रारम्भिको भागः। अत्र आदौ स्पष्टतया शिवपार्वत्योः प्रकारान्तरेण हरिहरयोर्वा वन्दना कृताऽस्ति। इयं वन्दना शास्त्रीय–परम्परायां नमस्कारात्मकं मङ्गलाचरणं कथ्यते।

अस्मिन् सर्गे पञ्चनवति सङ्ख्यकाः श्लोकाः सन्ति। तेषु अन्तिमः प्रहर्षिण्यां छन्दसि अन्ये सर्वेऽपि श्लोका अनुष्टुभि सन्ति। अस्मिन् सर्गे विनय–प्रकटनम्, सन्तानाभावेन जातो दुःखानुभवः, राज्ञो दिलीपस्य वसिष्ठाश्रमगमनम्, सन्तानप्राप्तये गुरोर्वसिष्ठस्य सोपायोपदेशश्चास्ति। सरले छन्दसि प्रकटितोऽपि विषयोऽत्यन्तं मनोहरः। अस्य सर्गस्य संयोजने कवेरुद्देश्यं सकलानपि प्रजाजनान् स्वापत्यानि इव मन्यमानस्य, परम्परा–रक्षायां निरन्तरं प्रयतमानस्य, कर्तव्य–निष्ठस्य नीतिमतो राज्ञो दिलीपस्य चरित्रचित्रणेन समाजे आदर्शमार्गस्य दृष्टान्तोपस्थापनं प्रजाजनस्य प्रवृत्तेश्च आदर्शोन्मुखीकरणमस्ति।

राज्ञो दिलीपस्य लोकातिशायि व्यक्तित्वम्, गुप्तमन्त्रणम्, यथोचितां दण्डव्यवस्थाम्, उचितभोगम्, प्रशंसां प्रति अनादरम्, कर्तव्यपरायणताम्, विद्वत्ताया उपयोगं तथा संस्कृतेः संरक्षणं च यथास्थानं यथोचितं वर्णयित्वा आर्य–परम्पराया उज्ज्वल आदर्शः कविना अस्मिन् सर्गे सम्यक् प्रदर्शितः प्राप्यते।

एतादृशो निष्ठावानपि दिलीपः पुत्रमुखदर्शनसौभाग्यं न लब्धवान्। अतः सुदक्षिणया महिष्या सह सन्तानाभावस्य कारणं तत्प्राप्त्युपायं च ज्ञातुं वसिष्ठाश्रमं प्रति गच्छता राज्ञा मार्गे दृष्टं प्राकृतदृश्यचित्रणं सुमनोहरमस्ति। तादृशप्राकृतदृश्येन प्रभावितौ राजदम्पती सन्ध्यायां वसिष्ठाश्रमं प्रापतुः। तदनन्तरम् ऋषिगणजुष्टम्, मृगसेवितम्, सुरभिहोमधूमगन्धि, प्रशान्तं सुमनोहरञ्चाश्रमपदं दृष्ट्वा राजा सुतरां प्रभावितोऽभवदिति वर्णनं चात्यन्तं मनोहरमस्ति।

आश्रमं गत्वा राजदम्पती गुरुदम्पत्योः पादपद्मानि ववन्दाते। ततो राज्ञो गुरोश्च मध्ये परस्परं क्षेमकुशलात्मिका या वार्ता भवति सा रुचिरा, मार्मिकी, गभीरा चास्ति। अन्यत् सर्वं कुशलं वर्णयित्वा राजा दिलीपः कुलगुरुं वसिष्ठं सन्तानाभावजनितं दुःखं न्यवेदयत्। ऋषिरपि क्षणं नेत्रे निमील्य सन्तानाभावस्य कारणं, सुरभिशाप इति तमवदत्। तच्छाप-विमोचनोपायश्च सौरभेय्या नन्दिन्या यथाविधि सेवा इति रहस्यप्रकाशनमपि अकरोत्। सन्तानपिपासया पीडितो दिलीपश्च सपत्नीकः सन् ततः प्रभृत्येव पर्णशालायां कुशशयने रात्रिं यापयन् सेवाव्रतं प्रारब्धवानिति रुचिरं वर्णनं कृत्वा कविः प्रथमं सर्गं समाप्नोति।

प्रथम–सर्गस्य सर्वमपि वैशिष्ट्यमधोलिखितप्रकारेण वर्गीकर्तुं शक्यते–

(१) प्राचीनाः कवयः प्रारब्धस्य कार्यस्य निर्विघ्न परिसमाप्तये ग्रन्थस्य आदौ मध्ये अन्ते च मङ्गलं कुर्वन्ति। तच्च मङ्गलं वस्तुनिर्देशात्मकं, नमस्कारात्मकम् आशीर्वादात्मकं वा भवति। अस्मिन् काव्ये शिव–पार्वत्योः नमस्कारात्मकं मङ्गलमस्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(२) काव्यं प्रारभमाणो महाकविः पूर्वजान् कवीन् प्रति विनयं कृतज्ञतां च अभिव्यनक्ति ।

(३) ततश्च रघुकुलस्य वैशिष्ट्यं वर्णितमस्ति । अस्मिन् एव प्रसङ्गे रघुवंशीयाः राजानश्चक्रवर्तिनोऽपि नियमनिष्ठाः, त्यागिनः, सत्यवादिनः, यशसे शत्रूञ्जेतुमिच्छवः, सन्तानार्थमेव वासनामुपभुञ्जानाः, बाल्यकाले विद्यार्थिनः, यौवने एव गृहस्थिनः, वृद्धावस्थायामेव वानप्रस्थाश्रयिणः, मृत्युकाले च योगिन इति रघुकुलस्य राज्ञां चरित्रं च वर्णितमस्ति ।

(४) ततश्च तदानीन्तनानां राज्ञां कर्तव्योल्लेख आयाति । राजकर्तव्यं च सनातनधर्मस्य रक्षणम्, प्रजानां हितार्थमेव करग्रहणम्, ज्ञाने मौनं न तु अस्थानेऽपि स्वेच्छया आदेशः, त्यागे अपि अप्रचारः, प्रजाजनस्य भरण–पोषणे, मर्यादारक्षणार्थमेव दण्डव्यवस्थापनं, धर्मपूर्वकमर्थलाभः, अलोभः, अनासक्तरूपेण कामोपभोगश्चासीदिति दिलीपचरित्रेण राजकर्तव्यं प्रतिपादितं लभ्यते । अत्रैव राजसंस्थायाः सामाजिक जीवनस्य च परस्परं सम्बन्धः समीपतर आसीदिति कविर्व्यनक्ति ।

(५) अस्मिन् एव सर्गे तदानीन्तनसमाजे सन्तानं प्रति कीदृशः अभिलाषः आसीदिति दृश्यते । आत्मनः पितृणां देवानां च सन्तोषाय धर्मकर्मसञ्चालनाय च सन्तानस्य आवश्यकता भवतीति प्राचीना धारणा अपि अत्रैव स्फुटा भवति ।

(६) अस्यः सर्गस्य अन्या महती विशेषता अस्ति यत्–कालिदासो तपोवन जीवनं प्रति आस्थावान् आसीत् ।

(७) अस्मिन् एव सर्गे राजसंस्थाया गुरुकुलस्य च विशिष्टः सम्बन्धः वर्णितः अस्ति । वनाधिवासी अपि गुरुः आदौ राज्यस्य कुशलं पृच्छति, राजा अपि गुरोः प्रभावेण सर्वं सुस्थमस्तीति निवेदयति । अनेन प्रसङ्गेन द्वयोः सम्बन्ध हार्दिक आसीदिति ज्ञायते ।

(८) अन्ते च गुरुकुलस्य उच्च आदर्श कुलस्य नियमनिष्ठा च वर्णिता अस्ति । गुरुकुलं राजकुलाश्रयं वाञ्छति सनातनधर्मविघातकेभ्य स्त्राण–प्राप्तये, राजकुलं गुरुकुलाश्रयमेव वाञ्छति अदृष्टदोषनाशादकण्टकराज्यसञ्चालनार्थमिति प्रथमसर्गस्य उल्लेखनीया विषयाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रघुवंशस्य प्रथमः सर्गः

वागर्थाविव संपृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ॥
१

क्व ? सूर्यप्रभवो वंशः क्व ? चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनास्मि सागरम् ॥
२

मन्दः कवियशः प्रार्थी गमिष्यामुपहास्यताम् ।
प्रांशुलभ्ये फले लोभादुद्बाहुरिव वामनः ॥
३

अथवा कृतवाग्द्वारे वंशेऽस्मिन्पूर्वसूरिभिः ।
मणौ वज्रसमुत्कीर्णे सूत्रस्येवास्ति मे गतिः ॥
४

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
५

यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथाऽपराधदण्डानां यथाकालप्रबोधिनाम् ॥
६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्यागाय संभृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ।।

७

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।।

८

रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन् ।
तद्‌गुणैः कर्णमागत्य चापलाय प्रचोदितः ।।

९

तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।।

१०

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम् ।
आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव ।।

११

तदन्वये शुद्धिमति प्रसूतः शुद्धिमत्तरः ।
दिलीप इति राजेन्दुरिन्दुः क्षीरनिधाविव ।।

१२

व्यूढोरस्को वृषस्कन्धः शालप्रांशुर्महाभुजः ।
आत्मकर्मक्षमं देहं क्षात्त्रो धर्म इवाऽऽश्रितः ।।

१३

सर्वातिरिक्तसारेण सर्वतेजोऽभिभाविना ।
स्थितः सर्वोन्नतेनोर्वीं क्रान्त्वा मेरुरिवात्मना ।।

१४

आकारसदृशप्रज्ञः प्रज्ञया सदृशागमः ।
आगमैः सदृशारम्भ आरम्भसदृशोदयः ।।

१५

भीमकान्तैर्नृपगुणैः स बभूवोपजीविनाम् ।
अधृष्यश्चाभिगम्यश्च यादोरत्नैरिवार्णवः ।।

१६

रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।।

१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत् ।
सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।।

१८

सेना परिच्छदस्तस्य द्वयमेवार्थसाधनम् ।
शास्त्रेष्वकुण्ठिता बुद्धिर्मौर्वी धनुषि चातता ।।

१९

तस्य संवृतमन्त्रस्य गूढाकारेङ्गितस्य च ।
फलानुमेयाः प्रारंभाः संस्काराः प्राक्तना इव ।।

२०

जुगोपात्मानमत्रस्तो भेजे धर्ममनातुरः ।
अगृध्नुराददे सोऽर्थमसक्तः सुखमन्वभूत् ।।

२१

ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः ।
गुणा गुणानुबन्धित्वात्तस्य सप्रसवा इव ।।

२२

अनाकृष्टस्य विषयैर्विद्यानां पारदृश्वनः ।
तस्य धर्मरतेरासीद्वृद्धत्वं जरसा विना ।।

२३

प्रजानां विनयाधानाद्रक्षणाद्भरणादपि ।
स पिता पितरस्तासां केवलं जन्महेतवः ।।

२४

स्थित्यै दण्डयतो दण्ड्यान्परिणेतुः प्रसूतये ।
अप्यर्थकामौ तस्याऽऽस्तां धर्म एव मनीषिणः ।।

२५

दुदोह गां स यज्ञाय सस्याय मघवा दिवम् ।
संपद्विनिमयेनोभौ दधतुर्भुवनद्वयम् ।।

२६

न किलानुययुस्तस्य राजानो रक्षितुर्यशः ।
व्यावृत्ता यत्परस्वेभ्यः श्रुतौ तस्करता स्थिता ।।

२७

द्वेष्योऽपि संमतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ।।

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तं वेधा विदधे नूनं महाभूतसमाधिना ।
तथा हि सर्वे तस्यासन्परार्थैकफला गुणाः ।।

२९

स वेलावप्रवलयां परिखीकृतसागराम् ।
अनन्यशासनामुर्वीं शशासैकपुरीमिव ।।

३०

तस्य दाक्षिण्यरूढेन नाम्ना मगधवंशजा ।
पत्नी सुदक्षिणेत्यासीदध्वरस्येव दक्षिणा ।।

३१

कलत्रवन्तमात्मानमवरोधे महत्यपि ।
तया मेने मनस्विन्या लक्ष्म्या च वसुधाऽधिपः ।।

३२

तस्यामात्मानुरूपायामात्मजन्मसमुत्सुकः ।
विलम्बितफलैः कालं स निनाय मनोरथैः ।।

३३

संतानार्थाय विधये स्वभुजादवतारिता ।
तेन धूर्जगतो गुर्वी सचिवेषु निचिक्षिपे ।।

३४

अथाभ्यर्च्य विधातारं प्रयतौ पुत्रकाम्यया ।
तौ दम्पती वसिष्ठस्य गुरोर्जग्मतुराश्रमम् ।।

३५

स्निग्धगम्भीरनिर्घोषमेकं स्यन्दनमास्थितौ ।
प्रावृषेण्यं पयोवाहं विद्युदैरावताविव ।।

३६

मा भूदाश्रमपीडेति परिमेयपुरःसरौ ।
अनुभावविशेषात्तु सेनापरिवृताविव ।।

३७

सेव्यमानौ सुखस्पर्शैः शालनिर्यासगन्धिभिः ।
पुष्परेणूत्किरैर्वातैराधूतवनराजिभिः ।।

३८

मनोऽभिरामाः श्रृण्वन्तौ रथनेमिस्वनोन्मुखैः ।
षड्जसंवादिनीः केका द्विधा भिन्नाः शिखण्डिभिः ।।

३९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परस्पराक्षिसादृश्यमदूरोज्झितवर्त्मसु ।
मृगद्वन्द्वेषु पश्यन्तौ स्यन्दनाबद्धदृष्टिषु ॥
४०

श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् ।
सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥
४१

पवनस्यानुकूलत्वात्प्रार्थनासिद्धिशंसिनः ।
रजोभिस्तुरगोत्कीर्णैरस्पृष्टालकवेष्टनौ ॥
४२

सरसीष्वरविन्दानां वीचिविक्षोभशीतलम् ।
आमोदमुपजिघ्रन्तौ स्वनिः श्वासानुकारिणम् ॥
४३

ग्रामेष्वात्मविसृष्टेषु यूपचिह्नेषु यज्वनाम् ।
अमोघाः प्रतिगृह्णन्तावर्घ्यानुपदमाशिषः ॥
४४

हैयङ्गवीनमादाय घोषवृद्धानुपस्थितान् ।
नामधेयानि पृच्छन्तौ वन्यानां मार्गशाखिनाम् ॥
४५

काप्यभिख्या तयोरासीद् व्रजतोः शुद्धवेषयोः ।
हिमनिर्मुक्तयोर्योगे चित्राचन्द्रमसोरिव ॥
४६

तत्तद्भूमिपतिः पत्न्यै दर्शयन्प्रियदर्शनः ।
अपि लङ्घितमध्वानं बुबुधे न बुधोपमः ॥
४७

स दुष्प्रापयशाः प्रापदाश्रमं श्रान्तवाहनः ।
सायं संयमिनस्तस्य महर्षेर्महिषीसखः ॥
४८

वनान्तरादुपावृत्तैः समित्कुशफलाहरैः ।
पूर्यमाणमदृश्याग्निप्रत्युद्यातैस्तपस्विभिः ॥
४९

आकीर्णमृषिपत्नीनामुटजद्वाररोधिभिः ।
अपत्यैरिव नीवार भागधेयोचितैर्मृगैः ॥
५०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेकान्ते मुनिकन्याभिस्तत्क्षणोज्झितवृक्षकम् ।
विश्वासाय विहङ्गानामालवालाम्बुपायिनाम् ॥

५१

आतपात्ययसंक्षिप्तनीवारासु निषादिभिः ।
मृगैर्वर्तितरोमन्थमुटजाङ्गनभूमिषु ॥

५२

अभ्युत्थिताग्निपिशुनैरतिथीनाश्रमोन्मुखान् ।
पुनानं पवनोद्धूतै धूर्मैराहुतिगन्धिभिः ॥

५३

अथ यन्तारमादिश्य धुर्यान्विश्रामयेति सः ।
तामवारोहयत्पत्नीं रथादवततार च ॥

५४

तस्मै सभ्याः सभार्याय गोप्त्रे गुप्ततमेन्द्रियाः ।
अर्हणामर्हते चक्रुर्मुनयो नयचक्षुषे ॥

५५

विधेः सायन्तनस्यान्ते स ददर्श तपोनिधिम् ।
अन्वासितमरुन्धत्या स्वाहयेव हविर्भुजम् ॥

५६



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तयोर्जगृहतुः पादान् राजा राज्ञी च मागधी।
तौ गुरुर्गुरुपत्नी च प्रीत्या प्रतिननन्दतुः ।।

५७

तमातिथ्यक्रियाशान्तरथक्षोभपरिश्रमम्।
पप्रच्छ कुशलं राज्ये राज्याश्रममुनिं मुनिः ।।

५८

अथाथर्वनिधेस्तस्य विजितारिपुरः पुरः।
अर्थ्यामर्थपतिर्वाचमाददे वदतां वरः ।।

५९

उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदम् ।।

६०

तव मन्त्रकृतो मन्त्रैर्दूरात्प्रशमितारिभिः ।
प्रत्यादिश्यन्त इव मे दृष्टलक्ष्यभिदः शराः ।।

६१

हविरावर्जितं होतस्त्वया विधिवदग्निषु ।
वृष्टिर्भवति सस्यानामवग्रहविशोषिणाम् ।।

६२

पुरुषायुषजीविन्यो निरातङ्का निरीतयः।
यन्मदीयाः प्रजास्तस्य हेतुस्त्वद्ब्रह्मवर्चसम् ।।

६३

त्वयैवं चिन्त्यमानस्य गुरुणा ब्रह्मयोनिना।
सानुबन्धाः कथं न स्युः संपदो मे निरापदः ।।

६४

किन्तु वध्वां तवैतस्यामदृष्टसदृशप्रजम् ।
न मामवति सद्वीपा रत्नसूरपि मेदिनी ।।

६५

नूनं मत्तः परं वंश्याः पिण्डविच्छेददर्शिनः।
न प्रकामभुजः श्राद्धे स्वधासंग्रह तत्पराः।।

६६

मत्परं दुर्लभं मत्वा नूनमावर्जितं मया।
पयः पूर्वैः स्वनिःश्वासैः कवोष्णमुपभुज्यते ।।

६७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सोऽहमिज्याविशुद्धात्मा प्रजालोपनिमीलितः।
प्रकाशश्चाप्रकाशश्च लोकालोक इवाचलः।।

६८

लोकान्तरसुखं पुण्यं तपोदानसमुद्भवम्।
सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे ।।

६९

तया हीनं विधातर्मां कथं पश्यन्न दूयसे।
सिक्तं स्वयमिव स्नेहाद्वन्ध्यमाश्रमवृक्षकम् ।।

७०

असह्यपीडं भगवन्नृणमन्त्यमवेहि मे ।
अरुन्तुदमिवालानमनिर्वाणस्य दन्तिनः।।

७१

तस्मान्मुच्ये यथा तात! संविधातुं तथाऽर्हसि ।
इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः।।

७२

इति विज्ञापितो राज्ञा ध्यानस्तिमितलोचनः ।
क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदः ।।

७३

सोऽपश्यत्प्रणिधानेन संततेः स्तम्भकारणम् ।
भावितात्मा भुवो भर्तुरथैनं प्रत्यबोधयत् ।।

७४

पुरा शक्रमुपस्थाप्य ततोर्वीं प्रति यास्यतः ।
आसीत्कल्पतरुच्छायामाश्रिता सुरभिः पथि ।।

७५

धर्मलोपभयाद्राज्ञामृतुस्नातामिमां स्मरन् ।
प्रदक्षिणक्रियाऽर्हायां तस्यां त्वं साधु नाचरः ।।

७६

अवजानासि मां यस्मादतस्ते न भविष्यति ।
मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप सा ।।

७७

स शापो न त्वया राजन्न च सारथिना श्रुतः ।
नदत्याकाशगङ्गायाः स्रोतस्युद्दामदिग्गजे ।।

७८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ईप्सितं तदवज्ञानाद्विद्धि सार्गलमात्मनः ।
प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।।

७९

हविषे दीर्घसत्रस्य सा चेदानीं प्रचेतसः ।
भुजङ्गपिहितद्वारं पातालमधितिष्ठति ।।

८०

सुतां तदीयां सुरभेः कृत्वा प्रतिनिधिं शुचिः ।
आराधय सपत्नीकः प्रीता कामदुघा हि सा ।।

८१

इति वादिन एवास्य होतुराहुतिसाधनम् ।
अनिन्द्या नन्दिनी नाम धेनुराववृते वनात् ।।

८२

ललाटोदयमाभुग्नं पल्लवस्निग्धपाटला ।
बिभ्रती श्वेतरोमाङ्कं सन्ध्येव शशिनं नवम् ।।

८३

भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि ।
प्रस्नवेनाभिवर्षन्ती वत्सालोकप्रवर्तिना ।।

८४

रजः कणैः खुरोद्धूतैः स्पृशद्भिर्गात्रमन्तिकात् ।
तीर्थाभिषेकजां शुद्धिमादधाना महीक्षितः ।।

८५

तां पुण्यदर्शनां दृष्ट्वा निमित्तज्ञस्तपोनिधिः ।
याज्यमाशंसितावन्ध्यप्रार्थनं पुनरब्रवीत् ।।

८६

अदूरवर्तिनीं सिद्धिं राजन्विगणयात्मनः ।
उपस्थितेयं कल्याणी नाम्नि कीर्तित एव यत् ।।

८७

वन्यवृत्तिरिमां शश्वदात्मानुगमनेन गाम् ।
विद्यामभ्यसनेनैव प्रसादयितुमर्हसि ।।

८८

प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः ।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः ।।

८९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वधूर्भक्तिमती चैनामर्चितामातपोवनात् ।
प्रयता प्रातरन्वेतु सायं प्रत्युद्व्रजेदपि ।।
९०

इत्याप्रसादादस्यास्त्वं परिचर्यापरो भव ।
अविघ्नमस्तु ते स्थेयाः पितेव धुरि पुत्रिणाम् ।।
९१

तथेति प्रतिजग्राह प्रीतिमान्सपरिग्रहः ।
आदेशं देशकालज्ञः शिष्यः शासितुरानतः ।।
९२

अथ प्रदोषे दोषज्ञः संवेशाय विशांपतिम् ।
सूनुः सूनृतवाक्स्रष्टुर्विससर्जोर्जितश्रियम् ।।
९३

सत्यामपि तपः सिद्धौ नियमापेक्षया मुनिः ।
कल्पवित्कल्पयामास वन्यामेवास्य संविधाम् ।।
९४

निर्दिष्टां कुलपतिना स पर्णशाला–
मध्यास्य प्रयतपरिग्रहद्वितीयः ।
तच्छिष्याध्ययननिवेदितावसानां
संविष्टः कुशशयने निशां निनाय ।।
९५

अभ्यास –प्रश्नावली

(क) अधोलिखितविषयाणां संक्षिप्तः परिचयो देयः–

(१) महाकवेः कालिदासस्य जीवनम् ।
(२) पद्यकाव्यस्य तात्पर्यं महाकाव्यस्य लक्षणम् च ।
(३) महाकवेः कालिदासस्य काव्यगतं वैशिष्ट्यम् ।
(४) रघुवंश–महाकाव्यस्य अतिसंक्षिप्तः सारः ।
(५) रघुवंशे प्रथम–सर्गस्य उल्लेखनीया विषयाः ।

(ख) रिक्त–स्थानेषु उचिताः शब्दाः भरणीयाः–

(१) महाकाव्यस्य कथावस्तुनः स्रोतः प्रायः .. .. भवति ।
(२) महाकाव्यं सर्गेषु .. .. भवति ।
(३) महाकाव्येषु प्रकृति–वर्णनस्य उद्देश्यं .. .. .. ।
(४) प्रारब्धस्य कार्यस्य .. .. मङ्गलाचरणं .. .. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(५) काव्यस्य वर्गीकरणं .. .. .. क्रियते । यथा– (क) .. .. .. ।
(ख) .. .. .. ।
(ग) .. .. .. ।

(६) बहूनां विदुषां मते कालिदासस्य समयः .. .. ।

(७) कालिदासस्य द्वे खण्डकाव्ये स्तः– (क) .. .. ।
(ख) .. .. ।

(८) काव्यस्याऽरम्भिके भागे कवेः .. .. प्रदर्शनमस्ति ।

(९) रघुवंशे दिलीप– .. .. आदीनां राज्ञां वर्णनमायाति ।

(ग) रिक्तं स्थानं ग्रन्थाक्षरैः पूरणीयम्–

(१) मणौ वज्रसमुत्कीर्णे .. .. गतिः ।

(२) .. .. निमित्तज्ञस्तपोनिधिः ।

(३) प्रस्थितायां प्रतिष्ठेथाः .. .. ।
.. .. पिबेरपः ॥

(घ) रिक्तं स्थानमधः प्रदत्तेषु शब्देषु उचिततमैः शब्दैः पूरयत–

(१) महाकाव्ये .. .. .. सर्गा आवश्यका भवन्ति ।
(क) अष्टाधिकाः (ख) पञ्चाधिकाः (ग) दश

(२) महाकाव्ये .. .. रसेषु कश्चिदेको मुख्यो भवति ।
(क) हास्य–रौद्र–भयानकेषु (ख) शृङ्गार–वीर–शान्तेषु

(३) अलौकिकीं विद्याशिषं प्राप्य प्रत्यागतं कालिदासं तस्य पत्नी आदौ अवदत्
.. .. इति ।
(क) अनावृत–कपाट–द्वारं देहि ।
(ख) प्रवेशमिच्छामि प्रिये !
(ग) अस्ति कश्चिद् वाग्विशेषः ?

(४) रघुवंश–महाकाव्यस्य भाषा .. .. रीतिः प्रायः.. .. गुणश्च प्रायशः स्थलेषु .. .. अस्ति ।
(क) वैदर्भी पाञ्चाली वा (ख) प्रसाद ओजो वा (ग) सरला सरसाा च

(५) रघुकुलस्याऽन्तिमो राजा .. .. आसीत् ।
(क) अजः (ख) दशरथः (ग) अग्निवर्णः ।

(६) रघुवंशस्य प्रथम–सर्गे .. .. छन्दसोः प्रयोगोऽस्ति ।
(क) इन्द्रवज्रोपेन्द्रवज्रयोः (ख) अनुष्टुप्प्रहर्षिण्योः ।

(७) राजदम्पती गुरुदम्पत्योः .. .. ववन्दाते ।
(क) हस्तपादम् (ख) चरणम् (ग) चरणे (घ) चरणकमलानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(८) रघुवंशस्य प्रथम–सर्गाद् गुरुकुलस्य .. .. .. ज्ञायते ।
पतनम् (ख) उच्चादर्शः (ग) अनावश्यकता

(९) "पार्वती–परमेश्वरौ" इति पदस्य विग्रहो द्विविधो भवितुं शक्नोति–
(१) .. .. ।
(२) .. .. ।

(ङ) निम्नाङ्कित–पदानां विग्रहः प्रदर्शनीयः–

पदानि	विग्रह–स्वरूपम्
(१) कवियशःप्रार्थी	
(२) व्यूढोरस्कः	
(३) निरीतयः	
(४) स्निग्धगम्भीरनिर्घोषम्	
(५) पल्लवस्निग्धपाटला	
(६) प्रयतपरिग्रहद्वितीयः	

(च) विग्रहवाक्यानां समासनामानि निष्पन्न–रूपाणि च लेख्यानि–

विग्रह–वाक्यानि	समासनामानि	निष्पन्न–रूपाणि
१. सर्वेभ्यः अतिरिक्तः सारः यस्य तेन		
२. दाक्षिण्येन रूढस्तेन		
३. ललाटे उदयः यस्य तम्		
४. विधिमनतिक्रम्य इति		
५. ऊर्जिता श्रीः येन तम्		
६. देशश्च कालश्च तौ जानातीति–		

(छ) उद्धृत–शब्दानां विशेषार्थं विलिख्य वाक्येषु प्रयोगं च दर्शयत–

शब्दाः	विशेषार्थः	प्रयोगः
१. मुनिवृत्तिः		
२. रेखामात्रम्		
३. निरीतयः		
४. तपोनिधिः		
५. सप्ताङ्गानि		
६. कुलपतिः		
७. निनाय		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ज) प्रतिप्रश्नं द्वित्राभिः पङ्क्तिभिरुत्तरं देयम्–

(१) दिलीपस्य वसिष्ठाश्रम–गमने किमुद्देश्यमासीत् ?

(२) दिलीपो वसिष्ठेन सह आदौ कां नाम चिन्तामावेदयत् ?

(३) वसिष्ठो दिलीपाय नन्दिन्याः शुश्रूषा–विधिं कथमुपदिदेश ?

(झ) उद्धृत–कवितासु स्पष्टं प्रतीयमानानामलङ्काराणां लक्षण–समन्वयो दर्शनीयः–

(१) क्व ? सूर्यप्रभवो वंशः क्व ? चाल्पविषया मतिः ।
तितीर्षुर्दुस्तरं मोहादुडुपेनाऽस्मि सागरम् ।।

(२) तं सन्तः श्रोतुमर्हन्ति सदसद्व्यक्तिहेतवः ।
हेम्नः सलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।।

(३) मत्परं दुर्लभं मत्वा नूनमावर्जितं मया ।
पयः पूर्वैः श्वनिश्वासैः कवोष्णमुपभुज्यते ।।

(ञ) निम्नस्थयोः श्लोकयोर्भावार्थौ लेख्यः–

(१) रेखामात्रमपि क्षुण्णादामनोर्वर्त्मनः परम् ।
न व्यतीयुः प्रजास्तस्य नियन्तुर्नेमिवृत्तयः ।।

(२) उपपन्नं ननु शिवं सप्तस्वङ्गेषु यस्य मे ।
दैवीनां मानुषीणां च प्रतिहर्ता त्वमापदान् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

द्वितीय–सर्गस्य

कथासार:

आर्यपरम्परामनुसृत्य पूजितां गुरोर्वसिष्ठस्य नन्दिनीं स्वाभीष्टसिद्धिकामनया चारयितुं राजा दिलीपो वनं प्रति गच्छति। राज्ञी सुदक्षिणा च राजानं नन्दिनीं च प्रातः साभिनन्दनं प्रेषयितुं सन्ध्यायाञ्च सस्वागतमर्चयितुञ्च तत्परा भवति। राजा वने गां गवा विहिता सर्वा अपि क्रियाश्छायारूपेणेवानुकुर्वन् परिचरति।

"प्रस्थितायां प्रतिष्ठेथाः स्थितायां स्थितिमाचरेः।
निषण्णायां निषीदास्यां पीताम्भसि पिबेरपः॥"

इति गुरोरुपदेशमनुसृत्य स राजा अपि–

"स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः।
जलाभिलाषी जलमाददानां छायेव तां (नन्दिनीम्) भूपतिरन्वगच्छत्॥"

इति श्लोकोक्तप्रकारेण अनुकरोति। न केवलं विविधक्रियाया एवानुकरणं किन्तु हरिततृणदानकण्डूयनादिना च पर्यचरत्। एतादृशक्रमेण सेवाप्रक्रियाया एकविंशतिर्दिनानि पूर्णानि भवन्ति। द्वाविंशे दिने वसिष्ठस्य नन्दिनी राज्ञोऽभिप्रायं परीक्षितुं हिमालयस्य कन्दरं प्रविशति। तदानीमेव कश्चिद् भयङ्करः सिंहस्तां नन्दिनीमाक्रामति। यदा सिंहो नन्दिनीमाक्रामति, तदा राजा हिमालयस्य मनोहरदृश्यदर्शने संलग्नो भवति। सिंहेन आक्रान्तां नन्दिनीं दृष्ट्वा राजा त्वरितं तं सिंहं प्रहर्तुमिच्छति। परन्तु बाणोद्धरणाय उद्यतो राज्ञो हस्तस्तत्रैव निरुद्धो भवति। अतः सिंहं प्रहर्तुमिच्छन् अपि राजा असमर्थो भवति।

राजा यदा सिंहं प्रहर्तुं न शक्नोति तदा सिंहदिलीपयोस्तर्कपूर्णः संवादो जायते। राजा स्वदेहं सिंहाय अर्पयित्वा अपि नन्दिनीं रक्षितुमिच्छति, सिंहो राजानं विहाय स्वाक्रान्तां नन्दिनीमेव भक्षयितुमिच्छति। सिंहमते वसिष्ठस्य नन्दिनीं त्यक्त्वा दिलीपस्य शरीर-रक्षा एव श्रेष्ठतरा भवति, दिलीपमते च स्वशरीरं त्यक्त्वाऽपि वसिष्ठस्य नन्दिन्या एव रक्षा कर्तव्या भवति। एवं क्रमेण सिंहदिलीपयोः संलापो जायत।

अन्ततो गत्वा सिंहो राजानं भक्षयित्वा नन्दिनीं त्यक्तुं स्वीकरोति। राजा अपि स्वशरीरमाकुञ्च्य आमिषस्य ग्रास इव तस्मै सिंहाय स्वदेहमर्पयति, कदा सिंहो भक्षयिष्यतीति विचारयन् प्रतीक्षते च।

तत्क्षणमेव नन्दिन्याः कृतं राज्ञः परीक्षणं सफलं भवति। नतशिरसं राजानं सम्बोध्य नन्दिनी "उत्तिष्ठ वत्स!" इति वदति। अमृत–तुल्यमीदृशं वचनं श्रुत्वा राजा प्रसन्नो विस्मितश्च भवति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनन्तरं नन्दिनी "तव भक्त्या प्रसन्ना अस्मि। पुत्र ! वरं वृणीष्व" इति राजानं वदति । राजा अपि वंशधरं तनयं ययाचे। कामदुघा नन्दिनी तथास्तु, इत्युक्त्वा स्वदुग्धं पत्रपुटे सन्दुहृय पातुमादिशति । दिलीपश्च गुरोरनुमतिं प्राप्य वत्सस्य वसिष्ठस्य नित्य–कर्मणश्च शेषमेव पातुमिच्छति । तत्पश्चात् राजा नन्दिनीमग्रेकृत्वा पूर्वेद्युरिव वनादाश्रमं प्रत्यागच्छति ।

अभीष्टवरप्राप्त्या प्रसन्नो राजा वसिष्ठाश्रममागत्य वने घटितां घटनामादौ गुरवे ततश्च सुदक्षिणायै निवेदयति । सेवाबलेन अभीष्टवरदानप्राप्त्या प्रसन्नौ राजदम्पती गुरुर्वसिष्ठो राजधानीमयोध्यां प्रति प्रस्थापयति । राजधान्यां राजदम्पत्योर्हार्दिकं स्वागतं सञ्जायते ।

नन्दिन्या आशिषः प्रभावेण राज्ञी सुदक्षिणा अपि गर्भवती जायते ।

अस्मिन् सर्गे अन्तिमः श्लोको मालिन्यां छन्दसि अन्ये च चतुःसप्ततिः श्लोका उपजातौ सन्ति । अस्य सर्गस्य इमा विशेषता उल्लेखनीयाः सन्ति ।

(१) कालिदाससमये धर्मरक्षायै एव सन्तानेच्छा क्रियते स्म।

(२) सन्तानप्राप्तेरुपायश्च तपोमूलक आसीत् । अर्थात् तपसः प्रभावेण एव सन्तानप्राप्तिर्भवति स्म।

(३) तदानीन्तने समये चक्रवर्तिनां राज्ञामपि जीवनं सेवामयमासीत्। यथा राजा दिलीपः गुरुं वसिष्ठं नन्दिनीं चासेवत, सेवाफलं च पुत्ररत्नं प्राप्नोत् ।

(४) महाकविः कालिदासः प्रकृतिचित्रणे अत्यन्त निपुण आसीत्। एवं च प्रकृतौ प्राप्तानां वस्तूनामपि स रमणीय–प्रकारेण चित्रणमकरोत् ।

(५) कालिदासस्य समयेऽपि साधनायाः फलप्राप्तेः पूर्वसूचनां प्रति महान् विश्वास आसीत्। यथा राजा दिलीपो नन्दिन्याः प्रसादो भविष्यतीति तस्याः प्रथम पूजनसमये एव अजानत्।

(६) अस्माकं परम्परायां गो–धनस्य महत्वपूर्णं स्थानमस्ति । यथा वसिष्ठस्य नन्दिन्या दिलीपस्य च परस्परं सम्बन्धः काव्ये प्रदर्शितोऽस्ति।

(७) ईश्वरशक्तिर्व्यक्तिशक्ते र्महीयसी भवतीति च।

(८) सत्य—निष्ठा एव कार्यसिद्धेर्महान् उपायो भवतीति ।

(९) मर्यादापालनम्, विनय–प्रदर्शनं च शास्त्रसम्मतो नियम इति च।

एतादृश्यो विशेषता रघुवंशस्य द्वितीयसर्गतो ज्ञायन्ते ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

रघुवंशस्य द्वितीयः सर्गः

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगन्धमाल्याम् ।
वनाय पीतप्रतिबद्धवत्सां यशोधनो धेनुमृषेर्मुमोच ॥
१
तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्तनीया ।
मार्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत् ॥
२
निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ।
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥
३
व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ।
न चान्यतस्तस्य शरीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥
४
आस्वादवद्भिः कवलैस्तृणानां कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत ॥
५
स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबन्धधीरः ।
जलाभिलाषी जलमाददानां छायेव तां भूपतिरन्वगच्छत् ॥
६
स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानुमितां दधानः ।
आसीदनाविष्कृतदानराजिरन्तर्मदावस्थ इव द्विपेन्द्रः ॥
७
लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावम् ।
रक्षोपदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्त्वान् ॥
८
विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य ।
उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः ॥
९
मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्त्तमानम् ।
अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः ॥
१०
धनुर्भृतोऽप्यस्य दयार्द्रभावमाख्यातमन्तः करणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां प्रकामविस्तारफलं हरिण्यः ॥
११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स कीचकैर्मारुतपूर्णरन्ध्रैः कूजद्भिरापादितवंशकृत्यम् ।
शुश्राव कुञ्जेषु यशः स्वमुच्चैरुद्गीयमानं वनदेवताभिः ॥
१२
पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकम्पितपुष्पगन्धी ।
तमातपक्लान्तमनातपत्रमाचारपूतं पवनः सिषेवे ॥
१३
शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्वेष्वधिको बबाधे तस्मिन् वनं गोप्तरि गाहमाने ॥
१४
सञ्चारपूतानि दिगन्तराणि कृत्वा दिनान्ते निलयायगन्तुम् ।
प्रचक्रमे पल्लवरागताम्रा प्रभा पतङ्गस्य मुनेश्च धेनुः ॥
१५
तं देवतापित्रतिथिक्रियाऽर्थामन्वग्ययौ मध्यमलोकपालः ।
बभौ च सा तेन सतां मतेन श्रद्धेव साक्षाद्विधिनोपपन्ना ॥
१६
स पल्लवोत्तीर्णवरायूथान्यावासवृक्षोन्मुखबर्हिणानि ।
ययौ मृगाध्यासितशाद्वलानि श्यामायमानानि वनानि पश्यन् ॥
१७
आपीनभारोद्वहनप्रयत्नाद्गृष्टिर्गुरुत्वाद्वपुषो नरेन्द्रः ।
उभावलञ्चक्रतुरञ्चिताभ्यां तपोवनावृत्तिपथं गताभ्याम् ॥
१८
वसिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात् ।
पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिव लोचनाभ्याम् ॥
१९
पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥
२०
प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ।
प्रणम्य चानर्च विशालमस्याः शृङ्गान्तरं द्वारमिवार्थसिद्धेः ॥
२१
वत्सोत्सुकाऽपि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननन्दतुस्तौ ।
भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिह्नानि पुरः फलानि ॥
२२
गुरोः सदारस्य निपीड्य पादौ समाप्य सान्ध्यञ्च विधिं दिलीपः ।
दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णाम् ॥
२३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तामन्तिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ।
क्रमेण सुप्तामनुसंविवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ।।
२४

इत्थं व्रतं धारयतः प्रजार्थं समं महिष्या महनीयकीर्तेः ।
सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य ।।
२५

अन्येद्युरात्मानुचरस्य भावं जिज्ञासमाना मुनिहोमधेनुः ।
गङ्गाप्रपातान्तविरूढशष्पं गौरीगुरोर्गह्वरमाविवेश ।।
२६

सा दुष्प्रधर्षा मनसाऽपि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन ।
अलक्षिताऽभ्युत्पतनो नृपेण प्रसह्य सिंहः किल तां चकर्ष ।।
२७

तदीयमाक्रन्दितमार्त्तसाधोर्गुहानिबद्धप्रतिशब्ददीर्घम् ।
रश्मिष्विवादाय नरेन्द्रसक्तां निवर्त्तयामास नृपस्य दृष्टिम् ।।
२८

स पाटलयां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ।
अधित्यकायामिव धातुमय्यां लोध्रद्रुमं सानुमतः प्रफुल्लम् ।।
२९



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततो मृगेन्द्रस्य मृगेन्द्रगामी वधाय वध्यस्य शरं शरण्यः ।
जाताभिषङ्गो नृपतिर्निषङ्गादुद्धर्तुमैच्छत् प्रसभोद्धृतारिः ॥
३०

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकङ्कपत्रे ।
सक्ताङ्गुलिः सायकपुङ्ख एव चित्रार्पितारम्भ इवावतस्थे ॥
३१

बाहुप्रतिष्टम्भविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृशद्भिः ।
राजा स्वतेजोभिरदह्यतान्तर्भोगीव मन्त्रौषधिरुद्धवीर्यः ॥
३२

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुम् ।
विस्माययन्विस्मितमात्मवृत्तौ सिंहोरुसत्त्वं निजगाद सिंहः ॥
३३

अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ॥
३४

कैलासगौरं वृषमारुरुक्षोः पदार्पणानुग्रहपूतपृष्ठम् ।
अवेहि मां किङ्करमष्टमूर्तेः कुम्भोदरं नाम निकुम्भमित्रम् ॥
३५

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषभध्वजेन ।
यो हेमकुम्भस्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः ॥
३६

कण्डूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथिता त्वगस्य ।
अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः ॥
३७

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ।
व्यापारितः शूलभृता विधाय सिंहत्वमङ्कागतसत्त्ववृत्तिः ॥
३८

तस्यालमेषा क्षुधितस्य तृप्त्यै प्रदिष्टकाला परमेश्वरेण ।
उपस्थिता शोणितपारणा मे सुरद्विषश्चान्द्रमसी सुधेव ॥
३९

स त्वं निवर्त्तस्व विहाय लज्जां गुरोर्भवान्दर्शितशिष्यभक्तिः ।
शस्त्रेण रक्ष्यं यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥
४०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

इति प्रगल्भं पुरुषाधिराजो मृगाधिराजस्य वचो निशम्य ।
प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥
४१

प्रत्यब्रवीच्चैनमिषुप्रयोगे तत्पूर्वभङ्गे वितथप्रयत्नः ।
जडीकृतस्त्र्यम्बकवीक्षणेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥
४२

संरुद्धचेष्टस्य मृगेन्द्र ! कामं हास्यं वचस्तद्यदहं विवक्षुः ।
अन्तर्गतं प्राणभृतां हि वेद सर्वं भवान्भावमतोऽभिधास्ये ॥
४३

मान्यः स मे स्थावरजङ्गमानां सर्गस्थितिप्रत्यवहारहेतुः ।
गुरोरपीदं धनमाहिताग्नेर्नश्यत्पुरस्तादनुपेक्षणीयम् ॥
४४

स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद ।
दिनावसानोत्सुकबालवत्सा विसृज्यतां धेनुरियं महर्षेः ॥
४५

अथान्धकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन् ।
भूयः स भूतेश्वरपार्श्ववर्ती किञ्चिद्विहस्यार्थपतिं बभाषे ॥
४६

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन्विचारमूढः प्रतिभासि मे त्वम् ॥
४७

भूतानुकम्पा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदन्ते ।
जीवन्पुनः शश्वदुपप्लवेभ्यः प्रजाः प्रजानाथ पितेव पासि ॥
४८

अथैकधेनोरपराधचण्डाद्गुरोः कृशानुप्रतिमाद् बिभेषि ।
शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नी ॥
४९

तद्रक्ष कल्याणपरम्पराणां भोक्तारमूर्जस्वलमात्मदेहम् ।
महीतलस्पर्शनमात्रभिन्नमृद्धं हि राज्यं पदमैन्द्रमाहुः ॥
५०

एतावदुक्त्वा विरते मृगेन्द्रे प्रतिस्वनेनास्य गुहागतेन ।
शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव ॥
५१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच ।
धेन्वा तदध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः ।।

५२

क्षतात्किल त्रायत इत्युदग्रः क्षत्त्रस्य शब्दो भुवनेषु रूढः ।
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा ।।

५३

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनाम् ।
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयाऽस्याम् ।।

५४

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ।
न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियाऽर्थः ।।

५५

भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।।

५६

किमप्यहिंस्यस्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ।
एकान्तविध्वंसिषु मद्विधानां पिण्डेष्वनास्था खलु भौतिकेषु ।।

५७

सम्बन्धमाभाषणपूर्वमाहुर्वृत्तः स नौ सङ्गतयोर्वनान्ते ।
तद्भूतनाथानुग ! नार्हसि त्वं सम्बन्धिनो मे प्रणयं विहन्तुम् ।।

५८

तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टम्भविमुक्तबाहुः ।
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य ।।

५९

तस्मिन् क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रम् ।
अवाङ्मुखस्योपरि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता ।।

६०

उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन् ।
ददर्श राजा जननीमिव स्वां गामग्रतः प्रस्रविणीं न सिंहम् ।।

६१

तं विस्मितं धेनुरुवाच साधो ! मायां मयोद्भाव्य परीक्षितोऽसि ।
ऋषिप्रभावान्मयि नान्तकोऽपि प्रभुः प्रहर्त्तुं किमुतान्यहिंस्राः ।।

६२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भक्त्या गुरौ मय्यनुकम्पया च प्रीताऽस्मि ते पुत्र वरं वृणीष्व ।
न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नाम् ।।

६३

ततः समानीय स मानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः ।
वंशस्य कर्त्तारमनन्तकीर्तिं सुदक्षिणायां तनयं ययाचे ।।

६४

सन्तानकामाय तथेति कामं राज्ञे प्रतिश्रुत्य पयस्विनी सा ।
दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुङ्क्ष्वेति तमादिदेश ।।

६५

वत्सस्य होमार्थविधेश्च शेषमृषेरनुज्ञामधिगम्य मातः ।
औधस्यमिच्छामि तवोपभोक्तुं षष्ठांशमुर्व्या इव रक्षितायाः ।।

६६

इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा बभूव ।
तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण ।।

६७

तस्याः प्रसन्नेन्दुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ।
प्रहर्षचिह्नानुमितं प्रियायै शशंस वाचा पुररुक्तयेव ।।

६८

स नन्दिनीस्तन्यमनिन्दितात्मा सद्वत्सलो वत्सहुतावशेषम् ।
पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्त्तमिवातितृष्णः ।।

६९



Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रातर्यथोक्तव्रतपारणान्ते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ।
तौ दम्पती स्वां प्रति राजधानीं प्रस्थापयामास वशी वसिष्ठः ।।

७०

प्रदक्षिणीकृत्य हुतं हुताशमनन्तरं भर्तुररुन्धतीं च ।
धेनुं सवत्सां च नृपः प्रतस्थे सन्मङ्गलोदग्रतरप्रभावः ।।

७१

श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः ।
ययावनुद्घातसुखेन मार्गं स्वेनेव पूर्णेन मनोरथेन ।।

७२

तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजार्थव्रतकर्शिताङ्गम् ।
नेत्रैः पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनाम् ।।

७३

पुरन्दरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनन्द्यमानः ।
भुजे भुजङ्गेन्द्रसमानसारे भूयः स भूमेर्धुरमाससञ्ज ।।

७४

अथनयनसमुत्थं ज्योतिरत्रेरिव द्यौः
सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशम् ।
नरपतिकूलभूत्यै गर्भमाधत्त राज्ञी
गुरुभिरविनिविष्टं लोकपालानुभावैः ।।

७५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास–प्रश्नावली

१. "क" समूह-शब्दानां "ख" समूहेन सम्बन्धं स्थापयत–

"क" समूहः	"ख" समूहः
(क) यश एव धनं यस्य सः	(क) चन्द्रमा
(ख) स्कन्दस्य माता	(ख) बहुव्रीहिसमासः
(ग) नौ	(ग) पार्वती
(घ) अत्रेर्नयनसमुत्थं ज्योतिः	(घ) सिंहदिलीपयोः

२. अधस्तनेन लघुगुरुक्रमेण सूच्यमाने छन्दसि काचित् कविता (एकैका) सङ्गमनीया–

(क) ।।।, ।।।, ऽऽऽ, ।ऽऽ, ।ऽऽ.

(ख) ।ऽ।, ऽऽ।, ।ऽ।, ऽऽ.

३. शुद्धाभिधानेषु एव निर्दिष्टं चिह्नं (√) देयम्–

(क) नन्दिनीं चारयितुं दिलीप एकाकी वनमगच्छत् ।

(ख) दिलीपतपस्यातो नन्दिनी द्वाविंशे दिने एव प्रसन्ना अभवत् ।

(ग) दिलीपो नन्दिनीमुद्दिश्य वने घटितां घटनामादौ सुदक्षिणामवदत् ।

(घ) "मान्यः स मे स्थावर-जङ्गमाना" मिति श्लोके 'सः' पदेन सिंहो ज्ञायते ।

(ङ) "अलं महीपाल ! तव श्रमेण" इति सिंहं प्रति दिलीपस्योक्तिः ।

(च) नन्दिन्याः स्कन्धे व्याघ्रो विरराज ।

४. अधस्तनमुद्धरणं सम्यगधीत्य उद्धरणस्य अधो दत्तानां प्रश्नानामुत्तरं देयम्—

(क) उद्धरणम्– "शशाम वृष्ट्याऽपि विना दवाग्निरासीद्विशेषा फलपुष्पवृद्धिः ।
ऊनं न सत्वेष्वधिको बवाधे तस्मिन् वनं गोप्तरि गाहमाने ।। "

(ख) प्रश्नाः–

(१) अत्र केन कारणेन कोऽलङ्कार आपतति ?

(२) 'तस्मिन्' पदेनाऽत्र कस्य सङ्केतः ?

(३) बलीयानपि दुर्बलं नापीडयदिति प्रतिपादनेन अत्र कस्य प्रभावातिशयः प्रदर्शितः?

(४) अत्र कथं किं छन्दः समन्वितं भवति ?

(५) अस्य उद्धरणस्थितस्य वृत्तस्य कति भेदाः स्युः ?

(६) वृष्टिं विनाऽपि दवाग्नेः शमनस्य फलपुष्पयोर्वर्द्धनस्य च प्रदर्शने किमत्र तात्पर्यम् ?

५. प्रतिप्रश्नं दशपङ्क्तिभ्योऽनधिकैः शब्दैरुत्तरं देयम्–

(क) सिंहदिलीपयोः संवादस्य वैशिष्ट्यम् ।

(ख) पार्वती देवदारोर्माता इति कल्पना ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) वसिष्ठनन्दिन्या दिलीप–देहस्य च उपयोगितायास्तुलना ।
(घ) अस्माकं प्ररम्परायां गोधनस्य महिमा ।
(ङ) ईश्वरीय–शक्ती राजशक्तिमतिक्रम्य तिष्ठति ।
(च) रघुवंश–द्वितीय–सर्गस्य कथासारः ।

६. प्रतिप्रश्नं संक्षिप्तमुत्तरं दत्त–

(क) राजचिह्नानि त्यजन् दिलीपोऽसौ चक्रवर्ती राजा इति जनै कथमज्ञायत ?
(ख) राजा दिलीपो नन्दिनीं कथमसेवत ?
(ग) धनुर्धारिणोऽपि दिलीपस्य हृदयं दयार्द्रमासीदिति प्रतिपादने कविना किञ्चित् प्रमाणं कल्पितमस्ति ? अस्ति चेत्कवितामुद्धृत्य वर्णयत ।
(घ) नन्दिन्या दिलीपस्य च शरीर–वर्णनं महाकविना कथं कृतमस्ति ?
(ङ) नन्दिनी उपासकमात्मनमनुग्रहीष्यतीति भाविनी घटना दिलीपेन प्रागेव कथमनुमिता ?
(च) गौरीर्गुरोर्गह्वरे प्रविष्टां नन्दिनीमुपरि तस्थुषः सिंहस्य तुलना कविना केन वस्तुना सह कृताऽस्ति ? तत्तुलनातः सिंहः कीदृशः प्रत्येति ?
(छ) आत्मानं प्रहर्तुमिच्छन्तं दिलीपं सिंहः प्रोत्साहितवान् अथवा निरुत्साहिवान् ? सोद्धरणं विविच्य लिखत ।
(ज) शिवेन सिंहो देवदारो रक्षार्थं कदा किमर्थं नियुक्त आसीत् ?
(झ) सिंहस्य विचारे नन्दिन्या घातुकमुपरि प्रहर्तुमशक्नुवतो दिलीपस्य यशो मलिनं जातमथवा उज्ज्वलमेवाऽस्ति ? सयुक्तिकं लिखत ।
(ञ) वसिष्ठस्य कृते नन्दिन्याः कीदृश उपयोगोऽस्ति ?
(ट) सिंहेन नन्दिनी त्याजा इति कथयितुं दिलीपेन आदौ को हेतुः प्रस्तुतः ?
(ठ) स्व–शरीरं सिंहाय भोजनार्थं (व्रतपारणायै) समर्प्य नन्दिन्या रक्षां कर्तुमिच्छन् दिलीपो नन्दिनीं विना आत्मन उपयोगं पश्यति न वा ?
(ड) "उत्तिष्ठ वत्स !" इति कस्मिन् प्रसङ्गे कं प्रति कस्य सम्बोधनम् ? स्फुटं कुरुत ।
(ढ) नन्दिनी दिलीपस्य भक्तिं परीक्ष्याऽपि समुत्तीर्णाय राज्ञे दिलीपाय प्रथमं किं कर्तुमादिशत् ?
(ण) सपत्नीको दिलीपो वसिष्ठाश्रमात् पदातिरेव प्रत्यागतः ? अथवा केनचिद् यानेन ?

७. अधोलिखित श्लोक सप्रसङ्गः(कदा, केन, किमर्थम्, कथित इति) सविस्तरं च व्याख्येयः–

श्लोकः—

"भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ।
स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥"

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाकविः भारविस्तस्य किरातार्जुनीयञ्च

(क) महाकविर्भारविः संस्कृत-काव्यसाहित्ये नवीनां शैलीमादाय प्रथमं प्रादुरभवत् । आदिकवेर्वाल्मीकेर्महाकवेः कालिदासस्य च समयात् स्वीकृतां काव्यधारां परिवृत्य भारविः काव्यलोकेऽवतीर्णोऽभवत् । भारवेः काव्यशैलीम् अलङ्कृत–शैलीम् इति मन्वते साहित्यिकाः, परन्तु कालिदासादीनां तु स्वाभाविक–शैली आसीदिति भारविः नवीनां शैलीं काव्ये स्वीकरोति स्म । तस्य संक्षिप्तः परिचयोऽत्र दीयते।

कालिदासस्येव भारवेर्जन्मकालविषये विवादो नास्ति। बहव इतिहासकाराः तस्य जन्मसमयः षष्ठं शतकम् (६०० ई.) इति निश्चिन्वन्ति । अन्ये केचन विद्वांसो विक्रमाब्दस्य षष्ठं शतकं मन्यन्ते । ६३४ ई. समयस्य शिला–लेखे भारवे र्नाम समायाति । दुर्विनीतनाम्ना किरातार्जुनीयस्य व्याख्याकारेणाऽपि अस्य कवेः समयः ५५०–६०० ई. इति उल्लिखितो लभ्यते । अत एवाऽस्य समयः विक्रमाब्दस्य षष्ठ शतकमथवा षष्ठ–शतकस्य आसन्न इति निश्चयप्रायो भवति ।

असौ कविश्चालुक्यवंशिनो नरेशस्य विष्णुवर्द्धनस्य सभापण्डित आसीत् । स नरेशो दाक्षिणात्य इति इतिहासेषु दृश्यते । अतो भारविरपि दाक्षिणात्यः कविरिति निश्चयोऽस्ति । #

अस्य कवेर्विषये एका किंवदन्ती प्रचलिता अस्ति । सा चैतादृशी विद्यते– भारविः समकालीनेषु रचनाकारेषु अग्रणीर्विद्वान् आसीत् । स निरन्तरमध्ययने व्यस्तोऽभवत् । यद्यपि भारवेरध्ययनात् तस्य पिता अपि सन्तुष्ट एव आसीत् तथापि पुत्रस्य सर्वतोमुखीं प्रगतिं कामयमानो भारवेः प्रगतौ असन्तुष्ट इव तं प्रति व्यवहरति स्म । अतो भारविर्हितैषिणमपि पितरं शत्रुवदमन्यत । यथा कश्चित् शत्रुः शत्रुं हन्तुमिच्छति, तथैव भारविरपि पितुर्हत्यां कर्तुमिच्छति स्म । परन्तु एकदा स मातुः सकाशात् जानाति स्म यत्– पिता तस्य अधिकाधिकां प्रगति- मिच्छन् तं प्रति कठोरं व्यवहारं करोति स्म । रहस्यमिदं ज्ञात्वा भारविरात्मनो मानसापराधस्य प्रायश्चित्तं कर्तुं विनीतः सन् पितरं प्रार्थयामास। पिता अपि षण्मासान् यावत् श्वसुरालये उषित्वा प्रायश्चित्तं कर्तुमादिशत् । भारविरपि पितुराज्ञां पालयन् श्वसुरालये षण्मासान् यावत् अवसत् ।

श्वसुरालयप्रवाससमये भारविर्महति आर्थिकसमस्यागर्तेऽपतत् । अतः आर्थिकसमस्यामतियातुं स काव्यरचनायां प्रवृत्तोऽभवत् । तदानीं भारविरेकं श्लोकं विलिख्य धनिकगृहं नीत्वा विक्रीणाति स्म ।

किरातार्जुनीयस्य हिमालयवर्णनं प्रमाणं मन्यमाना विद्वांसो भारविमौत्तरेयः कविरिति मन्यन्ते । अस्माकं नेपाली विद्वान् केशरबहादुरमहोदयस्तु कविममुं नेपालीति प्रमाणयति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

श्लोकस्यैकस्य एव लक्षरुप्यकमलभत अपि। एवं प्रकारेण स प्रायश्चित्तमकरोत् कविरपि अभवत् । स च श्लोकोऽयमेव आसीदिति बहूनां विदुषामुल्लेखः प्राप्यते—

"सहसा विदधीत न क्रियामविवेकः परमापदां पदम्।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव सम्पदः।"

एतादृशी किंवदन्ती भारवेर्जीवनेन सह सम्बद्धा अस्ति । भारवेर्महाकाव्यं किरातार्जुनीयञ्च तदानीन्तनसमयस्य एव रचना इति बहूनां विदुषां विचारोऽस्ति ।

(ख) किरातार्जुनीयं प्रागुक्तलक्षणैर्लक्षितं महाकाव्यमस्ति । महाभारतस्य वनपर्वणोऽस्य महाकाव्यस्य कथावस्तु गृहीतमस्ति । अस्य महाकाव्यस्य प्रारम्भः "श्री", शब्दाद् भवति, समाप्तिश्च "लक्ष्मी" शब्दाद् भवति । अष्टादशभिः सर्गैः रचितमिदं महाकाव्यं विद्वत्तायाः सुन्दरमुदाहरणं विद्यते । अस्मिन् महाकाव्ये नायको धीरोदात्तः । स च अर्जुनः, किरातरूपधारी शङ्करश्च प्रतिनाकः स्तः । किरातरूपधारिणः शङ्करस्य तीक्ष्णं वचनमुद्दीपनविभावः, अर्जुन–शङ्करयोर्नायक–प्रतिनायकयोः शराकर्षणादिव्यवहारोऽनुभावः, धैर्यक्षमादयश्च व्यविचारिभावाः, उत्साहः स्थायी भावोऽस्तीति अस्मिन् महाकाव्ये अङ्गीरसो वीररसः, श्रृङ्गारादयो रसाश्चात्र अङ्गरसाः, पाञ्चाली रीतिः, प्रसादो गुणः, वहुषु स्थलेषु अक्षरसंहतिर्नाम लक्षणम् वृत्यनुप्रास–यमकचित्रादयः शब्दालङ्काराः, उपमारूपक–श्लेषादयश्चार्थालङ्कारा अस्मिन् महाकाव्ये सन्ति । अन्ते च महाकाव्यस्य फलमर्जुनेन कृतः कौरवविजयार्थं पाशुपतास्त्रलाभोऽस्ति । मल्लिनाथटीकायामस्य महाकाव्यस्य विषये ईदृशी टिप्पणी प्राप्यते—

"नेता मध्यमपाण्डवो भगवतो नारायणस्यांशज-
स्तस्योत्कर्षकृते त्ववर्ण्यततरां दिव्यः किरातः पुनः ।
श्रृङ्गारादिरसोऽङ्गमत्र विजयी वीरः प्रधानो रसः
शैलाद्यानि च वर्णितानि बहुशो दिव्यास्त्रलाभः फलम् ॥" इति

स्वकीयैः शब्दैः महाकाव्यस्य कथासङ्क्षेपोऽधोलिखित प्रकारेण प्रस्तोतुं शक्यते–

द्यूतक्रीडायां दुर्योधनेन सह पराजितो युधिष्ठिरः पत्न्या द्रौपद्या भ्रातृभिश्च सह द्वादश वर्षाणि यावत् वनवासं वर्षमेकं गुप्तवासं च स्वीकरोति। अत एव प्रासादं परित्यज्य द्वैतवनमधिवसन् युधिष्ठिरो वनेचरद्वारा दुर्योधनस्य वृत्तान्तं जानाति। वनेचरो राज्ञे युधिष्ठिराय दुर्योधनस्य राज्यकौशलम्, न्यायप्रियताम्, नीतिमत्ताम्, लोकानुरागितां च आवेदयति । दुर्योधनस्य राज्यकौशलं ज्ञात्वा भीमस्त्वरते, द्रौपदी शौर्यप्रदर्शनाय प्रेरयति, सत्यवादी युधिष्ठिरस्तु शान्त एव भवति । अन्तराले व्यासोपदेशेन अर्जुन इन्द्रकील–नामके पर्वते तपः कर्तुं गच्छति। अर्जुनस्य तपसा शङ्करः प्रसीदति। अतः एव स्वयमर्जुनाग्रे शङ्करः प्रकटो भवति । अर्जुनः पाशुपतास्त्ररूपं वरं याचते। भगवान् शङ्करश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

धनुर्वेदस्य उपदेशं पाशुपतास्त्रञ्च अर्पयति । शङ्कराज्ञया इन्द्रादयो देवाश्च स्वं स्वमस्त्रं पार्थाय ददति । अन्ते शङ्कराज्ञया अर्जुनो युधिष्ठिर–समीपं प्रत्यागच्छति । एतादृश एव कथायाः सङ्क्षेपः किरातार्जुनीये महाकाव्येऽस्ति ।

अस्य काव्यस्य अधोलिखितं वैशिष्ट्यं स्मरणीयमस्ति—

(१) कवी राजनीतिं वर्णयन् साम–दाम–दण्ड–भेद–सिद्धान्तान् काव्यलालित्येन सह गम्भीरतया वर्णयति ।

(२) आर्यस्त्रीणां विचार–गाम्भीर्यम्, स्वाभिमानित्वं च भारविर्द्रौपद्या उक्ति-प्रत्युक्ती दर्शयन् वर्णयति ।

(३) पात्रोचितं शब्दगुम्फनं चास्य महाकाव्यस्य विशेषता अस्ति । अस्य प्रमाणं वनेचर–द्रौपदी–युधिष्ठिर–भीमादीनामुक्तिषु प्राप्यते ।

(४) अस्य महाकाव्यस्य सूक्ति–शैली, श्लेष–महिमा, प्रकृतिचित्रणमुपदेशपद्धतिः, अल्पीयसोऽपि वस्तुनो वर्णनचातुर्येण विस्तारश्च वैशिष्ट्ये गणयतुं शक्यन्ते ।

(५) महाकाव्ये किरातार्जुनयो र्युद्धं मुख्यो विषयः । एनम् विषयमधिकृत्य एव ग्रन्थनाम दत्तमिति अस्य महाकाव्यस्येदमपि वैशिष्ट्यमेव ।

(६) सत्यनिष्ठायां विश्वासः, स्त्रीणां चपलता, युद्धचमत्कारः, अवतारप्रभावः, आशीर्वादमहात्म्यम्, अनुशासनम्, नियमपालनं चास्य महाकाव्यस्य वैशिष्ट्यानि सन्ति ।

एतादृशै र्वैशिष्ट्यैर्युक्तमिदं महाकाव्यं संस्कृत–साहित्यस्य महाकाव्यपम्परायामत्यन्तं पठनीयं रोचकं शिक्षाप्रदमत एव महत्वपूर्णञ्चास्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रथम–सर्गस्य

कथासारः

अस्मिन् सर्गे आदौ चतुश्चत्वारिंशत् श्लोका वंशस्थे छन्दसि उपान्त्यः श्लोकः पुष्पिताग्रायामन्तिमश्च मालिन्यामस्ति ।

आदौ दुर्योधनस्य राज्यसञ्चालनपद्धतिं ज्ञातुं प्रेषितो वनेचरो ज्ञातवृत्तान्तः सन् युधिष्ठिरेण सह मिलति । अनेन युधिष्ठिरवनेचरयोर्मिलनेन कविनाऽत्र वस्तुनिर्देशात्मकं मङ्गलाचरणं प्रारब्धस्य कार्यस्य निर्विघ्नपरिसमाप्त्यर्थं प्रदर्शितमस्ति ।

तत्पश्चात् कविश्चरस्य गुणान् वर्णयति । स्पष्टवादिता, सत्यवादिता, कर्तव्यपरायणता, अभीरुता च चरस्य विशेषगुणेषु गण्यन्ते इति चरमुखेनैव भारविः स्वमतं स्थापयति ।

कपटपूर्णायां द्यूतक्रीडायां पराजितो युधिष्ठिरो विस्तृतं गम्भीरं कूटनीतिपूर्णं दुर्योधनस्य राज्यसञ्चालन पद्धतेः प्रतिवेदनं च वनेचरात् श्रृणोति । वनेचरप्रतिवेदनेन युधिष्ठिरो जानाति यत् दुर्योधनो भृत्यान् सहृदयान् सखीनिव, सखीन् बन्धूनिव, बन्धूँश्च राज्याधिकारिण इव दर्शयन् नीतिबलेन जनविश्वासेन च निरातङ्को निःशङ्कश्च भूत्वा राज्यं कुर्वाणोऽस्ति । दुर्योधनराज्ये भृत्याः, सुहृदः, कृषकाः, सैनिकाः, पुरोहिताः, प्रतिवेशिनश्च सन्तुष्टाः सन्तीत्यपि वनेचरो राज्ञे युधिष्ठिराय आवेदयति । एवं प्रकारेण दुर्योधनस्य राज्यस्थितिः प्रतिदिनं दृढा दृढतरा च प्रतीयमाना अस्तीति वनेचरो रहसि तस्मै राज्ञे युधिष्ठिराय स्पष्टं प्रतिवेदयति । प्रतिवेदनस्याऽन्ते वनेचरो बलीयस्याम–वस्थायां राज्यं कुर्वाणोऽपि दुर्योधनो युधिष्ठिरस्य नाम–मात्रश्रवणेनापि कम्पते । यदि युधिठिरः प्रयतेत चेत्तस्य पराजयो निश्चितोऽस्तीति पराजितस्य राज्यस्य पुनः प्राप्तये अनुकूला एव स्थिति विद्यते इत्यपि सूचयति । तत्पश्चात् युधिष्ठिरो वनेचराय समुचितं पारितोषिकं दत्वा विसृजति ।

तदनन्तरं युधिष्ठिरो वनेचरप्रतिवेदनं भीमादिभ्रातृसन्निधौ द्रौपदीं कथयति । प्रतिवेदनं श्रुत्वा द्रौपदी समर्थैरपि पाण्डुपुत्रै र्भुज्यमानां दुरवस्थां निर्वर्ण्य कुलाभिमानञ्च विचार्य दुर्योधनेन सह युद्धं कर्तुं युधिष्ठिरं प्रेरयति । भीमार्जुनयोः पराक्रमं च उल्लिखति । परन्तु युधिष्ठिरस्य युद्धोद्योगो न दृश्यते । अत एव अन्ते द्रौपदी युधिष्ठिरस्य राजचिह्नग्रहणं धनुर्धारणञ्च वृथा सञ्जातमिति चोल्लिखति । द्रौपदी परिणामे युधिष्ठिरं परामृशति यत्–त्रयोदशवर्षाणि यावत् प्रतीक्ष्यापि दुर्योधनो राज्यं युद्धं विना स्वेच्छया न वितरति । यदि अन्त्ये युद्धमवश्यं कर्तव्यमेवास्ति तर्हि समय प्रतीक्षणस्य न किञ्चित् फलम् ।

अत दुर्योधनेन सह कृतं पाण्डवानां निर्वासनं कौरवाणां च राज्यसञ्चालनरूपं सन्धिं भङ्क्त्वाऽपि युद्धोद्योगः कर्तव्य एवेति युधिष्ठिरे युद्धशक्तिः पुनः प्राप्ता भवतु इत्यपि द्रौपदी स्वेच्छामभिव्यनक्ति । प्रथम सर्गस्य एतादृशः कथा–संक्षेपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अस्मिन् सर्गे उल्लेखनीया विशेषता एतादृश्यः सन्ति ।

(१) आदौ वस्तुनिर्देशात्मकं मङ्गलाचरणम्

(२) निर्वासिता अपि राजानः स्वराज्यस्य वृत्तान्तं चरमाध्यमेन ज्ञातुं प्रयतन्ति । यथा युधिष्ठिरोऽजानत् ।

(३) चराणां कर्तव्यं किल वस्तुस्थितेर्यथार्थतः स्पष्टीकरणमेव । यथा वनेचरो युधिष्ठिराय प्रतिवेदितवान् ।

(४) राज्ञश्चरस्य च कर्तव्यं परस्परं विश्वास इति । यथा युधिष्ठिर–वनेचरयोरस्ति ।

(५) राज्यलक्ष्मी अनुकूलेषु एव राजामात्येषु रमते न तु प्रतिकूलेषु अपीति ।

(६) कापटचेनापि शक्तिलाभो भवितुं शक्नोति, परन्तु मनसि शङ्का अपि भवत्येव । अतो मनसि शान्ति र्न भवति । यथा कापटचेन हस्तगतं राज्यं कुर्वाणोऽपि दुर्योधनो युधिष्ठिरात् सशङ्कः सन् शास्ति स्म ।

(७) सफलोऽपि शास्ता यदि अन्यायी तर्हि बिभेत्येव ।

(८) नीतिविरुद्धमाचरन् शासकः कृत्रिमं प्रेम प्रदर्श्य अपि राज्यशक्तिं वोढुमिच्छति ।

(९) कुटिलोऽपि कुशलः शासको राज्यशक्तिमुपभोक्तुं सर्वानपि तोषयितुं प्रयतते । यथा दुर्योधनोऽकरोत् ।

(१०) चरा यदि स्वामिनोऽनुकूलं कार्यं कुर्यु स्तान् पुरस्कुर्वन्ति स्वामिनोऽपि । यथा युधिष्ठिरो वनेचरं पुरस्कृतवान् ।

(११) यदि पुरुषे अतिसहनशीलता भवेत्तर्हि स्त्रियस्तं गुणं कातरतां मत्वा तां स्थितिं त्यक्तुं पुरुषमपि बहुभिः प्रकारैः प्रेरयन्ति । यथा द्रौपदी युधिष्ठिरं प्रैरिरत् ।

(१२) अस्माकं कुलाङ्गनाः शत्रु–पक्षं प्रति करणीयं व्यवहारं कूटनीतिं च जानन्ति । तासु अपि पौरुषं भवति । यथा द्रौपद्याश्चरित्रमत्रोदाहरणं विद्यते ।

(१३) कुलीना नार्यः स्वाभिमानं सुविधाञ्च त्यक्तुं न शक्नुवन्ति । यथा द्रौपदी युधिष्ठिरं प्रति स्वविचारं प्रकटयति ।

(१४) पुरुषाणामपेक्षया नारीषु सुखेच्छा चपलता; बलवती तथा अधिका च भवतीति स्त्रीप्रकृतिः । यथा द्रौपद्याः प्रकृतिः कविना चित्रिताऽस्ति ।

एतादृशीभिर्विशेषताभिः प्रथमसर्गस्य महत्त्वं प्रवृद्धमस्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

किरातार्जुनीयस्य प्रथमः सर्गः

श्रियः कुरूणामधिपस्य पालनीं
प्रजासु वृत्तिं यमयुङ्क्त वेदितुम् ।
स वर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ।।
१

कृतप्रणामस्य महीं महीभुजे
जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं
प्रवक्तुमिच्छन्ति मृषा हितैषिणः ।।
२



द्विषां विघाताय विधातुमिच्छतो
रहस्यनुज्ञामधिगम्य भूभृतः ।
स सौष्ठवौदार्यविशेषशालिनीं
विनिश्चितार्थामिति वाचमाददे ।।
३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रियासु युक्तैर्नृप ! चारचक्षुषो
न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा
हितं मनोहारि च दुर्लभं वचः ॥

४

स किंसखा साधु न शास्ति योऽधिपं
हितान्न यः संश्रृणुते स किंप्रभुः ।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः ॥

५

निसर्गदुर्बोधमबोधविक्लवाः
क्व भूपतीनां चरितं क्व जन्तवः ।
तवानुभावोऽयमवेदि यन्मया
निगूढतत्त्वं नयवर्त्म विद्विषाम् ॥

६

विशङ्कमानो भवतः पराभवं
नृपासनस्थोऽपि वनाधिवासिनः ।
दुरोदरच्छद्मजितां समीहते
नयेन जेतुं जगतीं सुयोधनः ॥

७

तथाऽपि जिह्मः स भवज्जिगीषया
तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्
वरं विरोधोऽपि समं महात्मभिः ॥

८

कृतारिषड्वर्गजयेन मानवी–
मगम्यरूपां पदवीं प्रपित्सुना ।
विभज्य नक्तन्दिवमस्ततन्द्रिणा
वितन्यते तेन नयेन पौरुषम् ॥

९

सखीनिव प्रीतियुजोऽनुजीविनः
समानमानान् सुहृदश्च बन्धुभिः ।
स सन्ततं दर्शयते गतस्मयः
कृताधिपत्यामिव साधु बन्धुताम् ॥

१०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

असक्तमाराधयतो यथायथं
विभज्य भक्त्या समपक्षपातया ।
गुणानुरागादिव सख्यमीयिवान्
न बाधतेऽस्य त्रिगणः परस्परम् ।।
११

निरत्ययं साम न दानवर्जितं
न भूरि दानं विरहय्य सत्क्रियाम् ।
प्रवर्तते तस्य विशेषशालिनी
गुणानुरोधेन विना न सत्क्रिया ।।
१२

वसूनि वाञ्छन्न वशी न मन्युना
स्वधर्म इत्येव निवृत्तकारणः ।
गुरूपदिष्टेन रिपौ सुतेऽपि वा
निहन्ति दण्डेन स धर्मविप्लवम् ।।
१३

विधाय रक्षान्परितः परेतरा–
नशङ्किताकारमुपैति शङ्कितः ।
क्रियाऽपवर्गेष्वनुजीविसात्कृताः
कृतज्ञतामस्य वदन्ति सम्पदः ।।
१४

अनारतं तेन पदेषु लम्भिता
विभज्य सम्यग्विनियोगसत्क्रियाः ।
फलन्त्युपायाः परिबृंहितायती–
रुपेत्य संघर्षमिवार्थसम्पदः ।।
१५

अनेकराजन्यरथाश्वसङ्कुलं
तदीयमास्थाननिकेतनाजिरम् ।
नयत्ययुग्मच्छदगन्धिरार्द्रतां
भृशं नृपोपायनदन्तिनां मदः ।।
१६

सुखेन लभ्या दधतः कृषीवलै–
रकृष्टपच्या इव सस्यसम्पदः ।
वितन्वति क्षेममदेवमातृका–
श्चिराय तस्मिन् कुरवश्चकासति ।।
१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

उदारकीर्तेरुदयं दयावतः
प्रशान्तबाधं दिशतोऽभिरक्षया ।
स्वयं प्रदुग्धेऽस्य गुणैरुपस्नुता
वसूपमानस्य वसूनि मेदिनी ।।
१८

महौजसो मानधना धनार्चिता
धनुर्भृतः संयति लब्धकीर्तयः ।
न संहतास्तस्य न भिन्नवृत्तयः
प्रियाणि वाञ्छन्त्यसुभिः समीहितुम् ।।
१९

महीभृतां सच्चरितैश्चरैः क्रिया
न वेद निःशेषमशेषितक्रियः ।
महोदयैस्तस्य हितानुबन्धिभिः
प्रतीयते धातुरिवेहितं फलैः ।।
२०

स तेन सज्यं क्वचिदुद्यतं धनुः
कृतं न वा कोपविजिह्ममाननम् ।
गुणानुरागेण शिरोभिरुह्यते
नराधिपैर्माल्यमिवास्य शासनम् ।।
२१

स यौवराज्ये नवयौवनोद्धतं
निधाय दुःशासनमिद्धशासनः ।
मखेष्वखिन्नोऽनुमतः पुरोधसा
धिनोति हव्येन हिरण्यरेतसम् ।।
२२

प्रलीनभूपालमपि स्थिरायति
प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यती–
रहो दुरन्ता बलवद्विरोधिता ।।
२३

कथाप्रसङ्गेन जनैरुदाहृता–
दनुस्मृताखण्डलसूनुविक्रमः ।
तवाभिधानाद्व्यथते नताननः
स दुःसहान्मन्त्रपदादिवोरगः ।।
२४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसारा खलु मादृशां गिरः ।।

२५

इतीरयित्वा गिरमात्मसत्क्रिये
गतेऽथ पत्यौ वनसन्निवासिनाम् ।
प्रविश्य कृष्णासदनं महीभुजा
तदाचचक्षेऽनुजसन्निधौ वचः ।।

२६

निशम्य सिद्धिं द्विषतामपाकृति–
स्ततस्ततस्त्या विनियन्तुमक्षमा ।
नृपस्य मन्युर्व्यवसायदीपिनी–
रुदाजहार द्रुपजात्मजा गिरः ।।

२७

भवादृशेषु प्रमदाजनोदितं
भवत्यधिक्षेप इवानुशासनम् ।
तथाऽपि वक्तुं व्यवसाययन्ति मां
निरस्तनारीसमया दुराधयः ।।

२८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अखण्डमाखण्डलतुल्यधामभि-
श्चिरं धृता भूपतिभिः स्ववंशजैः ।
त्वयाऽत्महस्तेन मही मदच्युता
मतङ्गजेन स्रगिवापवर्जिता ॥
२९

व्रजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।
प्रविश्य हि घ्नन्ति शठास्तथाविधा-
नसंवृताङ्गान्निशिता इवेषवः ॥
३०

गुणानुरक्तामनुरक्तसाधनः
कुलाभिमानि कुलजां नराधिपः।
परैस्त्वदन्यः क इवापहारये-
न्मनोरमामात्मवधूमिव श्रियम् ॥
३१

भवन्तमेतर्हि मनस्विगर्हिते
विवर्तमानं नरदेव वर्त्मनि ।
कथं न मन्युर्ज्वलयत्युदीरितः
शमीतरुं शुष्कमिवाग्निरुच्छिखः ॥
३२

अवन्ध्यकोपस्य विहन्तुरापदां
भवन्ति वश्याः स्वयमेव देहिनः।
अमर्षशून्येन जनस्य जन्तुना
न जातहार्देन न विद्विषादरः ॥
३३

परिभ्रमँल्लोहितचन्दनोचितः
पदातिरन्तर्गिरि रेणुरुषितः।
महारथः सत्यधनस्य मानसं-
दुनोति नो कच्चिदयं वृकोदरः ॥
३४

विजित्य यः प्राज्यमयच्छदुत्तरा-
न्कुरूनकुप्यं वसु वासवोपमः।
स वल्कवासांसि तवाधुनाऽऽहरन्
करोति मन्युं न कथं धनञ्जयः ॥
३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वनान्तशय्याकठिनीकृताकृती
कचाचितौ विष्वगिवागजौ गजौ ।
कथं त्वमेतौ धृतिसंयमौ यमौ
विलोकयन्नुत्सहसे न बाधितुम् ।।

३६

इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तयः ।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेतः प्रसभं ममाऽऽधयः ।।

३७

पुराधिरूढः शयनं महाधनं
विबोध्यसे यः स्तुतिगीतमङ्गलैः ।
अदभ्रदर्भामधिशय्य स स्थलीं
जहासि निद्रामशिवैः शिवारुतैः ।।

३८

पुरोपनीतं नृप रामणीयकं
द्विजातिशेषेण यदेतदन्धसा ।
तदद्य ते वन्यफलाशिनः परं
परैति कार्श्यं यशसा समं वपुः ।।

३९

अनारतं यौ मणिपीठशायिना–
वरञ्जयद्राजशिरःस्रजां रजः ।
निषीदतस्तौ चरणौ वनेषु ते
मृगद्विजालूनशिखेषु वर्हिषाम् ।।

४०

द्विषन्निमित्ता यदियं दशा ततः
समूलमुन्मूलयतीव मे मनः ।
परैरपर्यासितवीर्यसम्पदां
पराभवोऽप्युत्सव एव मानिनाम् ।।

४१

विहाय शान्ति नृप धाम तत्पुनः
प्रसीद सन्धेहि वधाय विद्विषाम् ।
व्रजन्ति शत्रुनवधूय निःस्पृहाः
शमेन सिद्धि मुनयो न भूभृतः ।।

४२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुरःसरा धामवतां यशोधनाः
सुदुःसहं प्राप्य निकारमीदृशम् ।
भवादृशाश्चेदधिकुर्वते रतिं
निराश्रया हन्त हता मनस्विता ।।
४३

अथ क्षमामेव निरस्तविक्रमः
चिराय पर्येषि सुखस्य साधनम् ।
विहाय लक्ष्मीपतिलक्ष्म कार्मुकं
जटाधरः सन् जुहुधीह पावकम् ।।
४४

न समयपरिरक्षणं क्षमं ते
निकृतिपरेषु परेषु भूरिधाम्नः ।
अरिषु हि विजयार्थिनः क्षितीशा
विदधति सोपधि सन्धिदूषणानि ।।
४५

विधिसमयनियोगाद्दीप्तिसंहारजिह्मं
शिथिलवसुमगाधे मग्नमापत्पयोधौ ।
रिपुतिमिरमुदस्योदीयमानं दिनादौ
दिनकृतमिव लक्ष्मीस्त्वां समभ्येतु भूयः ।।
४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सूक्तीनां संग्रहः

सूक्तिर्हि उक्तेर्मनोहरा सूत्रात्मिका प्रसङ्गसापेक्षा व्यवहारोपयोगिनी शिक्षाप्रदा च कवि–वाणी । प्राचीनैः सूक्तिषु महान् सारो दृष्टः । अत एवोपदेशस्तेषामस्ति— "कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः संग्रहः ।" इति ।

सुभाषितं सूक्तिश्च शब्दान्तरमात्रम् । या काव्योक्तिः रमणीयः गम्भीरार्था संक्षिप्ता च भवति सा सूक्तिः इत्यपि परिभाषितुं शक्यते ।

संस्कृतस्य इयं सूक्ति रेव अस्माकं नेपाली भाषायां प्रचलितैः 'उखान' 'टुक्का' वा 'आहान' शब्दैः सदृशी इति कथ्यते । यथा 'आधा भाँडो छचल्किन्छ' 'मनको बह कसैलाई न कह' 'चिची पनि पापा पनि कहाँ पाउनु' इत्यदीनां व्यवहार इव संस्कृते अपि 'अर्धो घटो घोषमुपैति नूनम्' 'विचित्ररूपा खलु चित्तवृत्तयः' 'हितं मनोहारि च दुर्लभं वचः' इत्यादीनां व्यवहारो भवति । एतादृशो वाग् व्यवहार एव सूक्तिरिति विद्वांसो वदन्ति । महाकविभिः स्वरचनासु बहुषु स्थलेषु सारगर्भा उक्त्यो भिन्नाभिन्नतात्पर्येण व्यक्ताः सन्ति ।

(१) क्वचित् स्वोक्तेः समर्थनाय । यथा–

'अलं महीपाल ! तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।'

इत्यस्य समर्थनाय एव–

'न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ।'

इत्युक्तिर्न्यस्ता ।

(२) कुत्रचित् च सिद्धान्तस्थापनाय ।

यथा– "सम्बन्धमाभाषणपूर्णमाहु"

"प्रसादचिह्नानि पुरः फलानि"

"हितं मनोहारि च दुर्लभं वचः" इत्यादिसूक्तिसन्दोहः ।

(३) कुत्रचित् स्थले च कवयो लोकोक्ति प्रकटयितुं सूक्ति प्रयुञ्जते ।

यथा– "हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।"

"विचित्ररूपा खलु चित्तवृत्तयः ।"

इत्यादि सूक्तीनां प्रसङ्ग उक्तप्रकारक एव । रघुवंशस्य प्रथमद्वितीयसर्गयोः किरातार्जुनीयस्य प्रथमसर्गे च प्रयुक्तानां सूक्तीनां संक्षिप्तः संग्रहश्चात्र क्रियते । एतासां प्रसङ्गश्छात्रैरन्वेषणीयस्तात्पर्यं महत्त्वमुपयोगिता च कक्षापाठविषयः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

क्रमः	सूक्तयः	ग्रन्थः	सर्गः
१.	प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः।	किरातार्जुनीयम्	प्रथमः
२.	हितं मनोहारि च दुर्लभं वचः।	किरातार्जुनीयम्	प्रथमः
३. (क)	स किंसखा साधु न शास्ति योऽधिपं	किरातार्जुनीयम्	प्रथमः
(ख)	हितान्न यः संश्रृणुते स किंप्रभुः ।।	किरातार्जुनीयम्	प्रथमः
४.	सदानुकूलेषु हि कुर्वते रतीं नृपेष्वमात्येषु च सर्व सम्पदः ।	किरातार्जुनीयम्	प्रथमः
५.	अहो ! दुरन्ता बलवद्विरोधिता ।	किरातार्जुनीयम्	प्रथमः
६.	व्रजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।	किरातार्जुनीयम्	प्रथमः
७. (क)	अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।	किरातार्जुनीयम्	प्रथमः
(ख)	अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ।।	किरातार्जुनीयम्	प्रथमः
८.	विचित्ररूपा खलु चित्तवृत्तयः ।	किरातार्जुनीयम्	प्रथमः
९.	परैरपर्यासितवीर्यसम्पदां पराभवोऽप्युत्सव एव मानिनाम् ।	किरातार्जुनीयम्	प्रथमः
१०.	निराश्रया हन्त हता मनस्विता ।	किरातार्जुनीयम्	प्रथमः
११.	अरिषु हि विजयार्थिनः क्षितीशा विदधति सोपधि सन्धिदूषणानि ।	किरातार्जुनीयम्	प्रथमः
१२.	हेम्नः संलक्ष्यते ह्यग्नौ विशुद्धिः श्यामिकाऽपि वा ।	रघुवंशम्	प्रथमः
१३.	सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः ।	रघुवंशम्	प्रथमः
१४.	फलानुमेयाः प्रारंभाः ।	रघुवंशम्	प्रथमः
१५.	सन्ततिः शुद्धवंश्या हि परत्रेह च शर्मणे।	रघुवंशम्	प्रथमः
१६.	प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः ।	रघुवंशम्	प्रथमः
१७.	स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।	रघुवंशम्	द्वितीयः
१८.	प्रसादचिह्नानि पुरःफलानि ।	रघुवंशम्	द्वितीयः
१९.	न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्च्छति मारुतस्य ।	रघुवंशम्	द्वितीयः
२०.	शस्त्रेण शक्यं यदशक्यरक्ष्यं न तद्यशः शस्त्रभृतां क्षिणोति ।	रघुवंशम्	द्वितीयः
२१.	स्थातुं नियोक्तुर्न हि शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ।	रघुवंशम्	द्वितीयः
२२.	सम्बन्धमाभाषणपूर्वमाहुः ।	रघुवंशम्	द्वितीयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अभ्यास—प्रश्नावली

१. अधोलिखितेषु विषयेषु संक्षिप्ताष्टिप्पणी लिखत—

(क) भारवेः परिचयः ।

(ख) महाकाव्यस्य वैशिष्टयं तथा किरातार्जुनीयम् ।

(ग) किरातार्जुनीय–महाकाव्यस्य वैशिष्टयम् ।

(घ) किरातार्जुनीये प्रथम–सर्गस्य कथासारः ।

(ङ) वनेचर–प्रतिवेदनं प्रति द्रौपद्या विचारः ।

(च) कविचित्रिता नकुलसहदेवयोरवस्था ।

२. अधस्तनानां सूक्तिनामाशयं विलिख्य सन्दर्भश्च सविस्तरं लेखनीयः–

(क) हितं मनोहारि च दुर्लभं वचः ।

(ख) वरं विरोधोऽपि समं महात्मभिः ।

(ग) विचित्ररूपाः खलु चित्तवृत्तयः ।

(घ) निराश्रया हन्त हता मनस्विता ।

३. समूहद्वये सम्बन्धं स्थापयत –

"क" समूहः	"ख" समूहः
(क) कृतप्रणामस्य	(१) सखीनिव प्रीतियुजोऽनुजीविनः
(ख) उपमालङ्कारः	(२) वनेचर–विशेषणम्
(ग) गुरुणा उपदिष्टस्तेन	(३) बहुव्रीहिः
(घ) अवन्ध्यः कोपो यस्य सः	(४) तृतीया–तत्पुरुषः
(ङ) कथाप्रसङ्गः	(५) द्रौपद्या उच्छ्वासः
(च) रुजन्ति चेतः प्रसभं ममाधयः	(६) विषवैद्यः

४. अधस्तन–शब्दानां विशेषार्थः सन्दर्भश्च लेखनीयः–

शब्दः	विशेषार्थः	सन्दर्भः
१. चारचक्षुः		
२. दुरोदरच्छद्म		
३. षड्वर्गजयः		
४. त्रिगणः		
५. तवाभिधानम्		
६. गुरूपदिष्टा दण्डव्यवस्था		
७. न समयपरिरक्षणम्		

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५. रिक्तं स्थानमुचितैः शब्दैः पूरणीयम्–

(क) भारविः संस्कृतसाहित्ये ..... काव्य–शैलीं प्रारब्धवान् ।

(ख) भारवेः समयो विक्रमाब्दस्य ...... शतकमिति विदुषां विचारोऽस्ति ।

(ग) किरातार्जुनीये आदौ .... मङ्गलाचरणमस्ति ।

(घ) युधिष्ठिरो वनेचरात् ...... श्रुत्वा तस्मै ...... दत्वा विससर्ज ।

६. ग्रन्थाक्षरैः रिक्तं स्थानं पूरयत–

(क) सुखेन लभ्या .... सस्यसम्पदः ।

(ख) परप्रणीतानि .... गिरः ।

(ग) अरिषु हि .... दूषणानि ।

७. सन्दर्भमुल्लिख्य व्याख्या कार्या–

(क) व्रजन्ति शत्रूनवधूय निःस्पृहाः
शमेन सिद्धिं मुनयो न भूभृतः ।

(ख) वृजन्ति ते मूढधियः पराभवं
भवन्ति मायाविषु ये न मायिनः ।

८. अधस्तनानां प्रश्नानां सविस्तरमुत्तरं देयम्–

(क) किरातार्जुनीयस्य कथावस्तुनः स्रोतः कविकल्पना, पुराणमितिहासो वा किमस्ति ? कथं च तत् स्रोतो ज्ञायते ?

(ख) किरातार्जुनीयस्य कानि वैशिष्ट्यानि सन्ति ?

(ग) किराताजुनीये कथं कः रसः अङ्गी इति स्वीक्रियते ?

(घ) वनेचर – शब्दे गुप्तचराणां कर्तव्यं कीदृशं भवितुमर्हति ? युधिष्ठिरस्य गुप्तचरः स्वकर्तव्ये दृढः शिथिलो वा कीदृश प्रत्येति ?

(ङ) दुर्योधनश्छद्मजितं राज्यं निशङ्कमुपभुञ्जान आसीदथवा अन्या अपि चेष्टास्तस्याऽऽसन् ? वनेचर–प्रतिवेदनेन कथं प्रतीयते ?

(च) दुर्योधनस्य न्याय–व्यवस्था कीदृशी आसीत् ? स्वकीये परकीयेऽपि समाना अथवा पक्षपातिनी ?

(छ) दुर्योधन केषां कृते प्राणेभ्योऽपि प्रिय आसीत् ?

(ज) यज्ञादि कर्मणि प्रवृत्तो दुर्योधनो राज्यभारं कमुपरि निक्षिप्तवान् ?

(झ) "जस्तालाई तस्तै ढिढालाई निस्तै" इत्युक्तेः भावार्थः "वृजन्ति ते मूढधियः पराभवं भवन्ति मायाविषु ये न मायिनः ।" इति श्लोकेन सह मिलति ना वा? मिलति चेत्साम्यं न मिलति चेद् वैपरीत्यं दर्शयत।

(ञ) द्रौपदी भीमसेनस्य कीदृशं चित्रं प्रस्तौति ? प्रसन्नं वा खिन्नम् ?

(ट) राज्यकाले वनवासकाले च युधिष्ठिरस्य राज्ञो निद्रात्यागकालीके दृश्ये को भेद आसीत् ? सम्यक् तुलना कार्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ठ) राजानो मुनयश्च सदृशेन एव मार्गेण सफलतां प्राप्तुं शक्नुवन्ति ? उताहो उभयोरपि पृथङ्मार्गौ स्तः ?

(ड) किरातार्जुनीयस्य प्रथमे सर्गे कतिच्छन्दांसि प्रयुक्तानि सन्ति ? कानि च तानि ? सलक्षणं लिखत ।

९. अधस्तनीं कवितामधीत्य तदधो दत्तान् प्रश्नान् समाधत्त–

"तदाशु कर्तुं त्वयि जिह्ममुद्यते
विधीयतां तत्र विधेयमुत्तरम् ।
परप्रणीतानि वचांसि चिन्वतां
प्रवृत्तिसाराः खलु मादृशां गिरः ॥"

प्रश्नाः– १. अत्र किं छन्दः प्रयुक्तमस्ति ?

२. इयं कं प्रति कस्योक्तिः ?

३. अस्मिन् श्लोके कः अलङ्कारः कथं समन्वितो भवति ?

४. 'तत्, त्वयि, तत्र' शब्दानां कीदृशाः पर्याया स्तात्पर्यं बोधयेयुः ?

५. उपर्युक्त–श्लोकाधारे गुप्तचराणां प्रतिवेदनं विश्वसनीयमविश्वसनीयं वा कीदृशं भवति ?

६. गुप्तचराः प्रतिवेदनस्य सङ्कलनं कथं कुर्वन्ति ? किमस्ति तेषां मुख्य स्रोतः ?

७. अद्यत्वे अपि गुप्तचराणां कार्यं वनेचरस्य कार्येण सह समन्वेति ?

११९५५

वाल्मीकि विद्यापीठ

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृत

श्री ५ को सरकार, जनक शिक्षा सामग्री केन्द्रद्वारा प्रकाशित
मुद्रकः- एजुकेशन प्रेस

Nepal Sanskrit University, Balmeeki Campus, Kathmandu